[8] Om. one हा E only.

[9] त्यक्तो° for परित्यक्तो° I_1 only.

[10] समाश्वसिहि २ I_1, Md, Mt, Mg समाश्वसिहि cett.

[11] मातुल K, E, I_2, Md, Mt, Mg मातुल corr. to मातुल२ Cu मातुल२ cett.

[12] धारय त्वाम् E उद्धर माम् Mt धारयस्व माम् cett.

[13] भद्र om. K only.

[14] एवं भवन्तं for एवमयं E only.

[15] All but Cu, E, K add २ here.

[16] आर्य I_1, Bo, W, Sc, I_2 आर्यः Md हा आर्य Mt आर्य om. Cu, E, K.

रामः । परिष्वज्य[1] । मत्पादस्पृष्टिकया[2][3] प्रतिनिवर्तस्व । सम्प्रति सम्भावय चिरप्रमूढौ[4] तातौ ॥

भर॰ । अयमिदानीमहं

नन्दिग्रामे जटां[5] बिभ्रदभिषिच्यार्यपादुके ।
पालयिष्यामि पृथिवीं यावदार्यो निवर्तते ॥५५॥

सीतारामौ प्रदक्षिणीकरोति ॥

लक्ष्म॰ । आर्य भरत लक्ष्मणः प्रणमति ॥

भरतः परिष्वज्य[6] वाष्पस्तम्भं[7] नाटयति ॥

रामः । वत्स[8] तातौ सम्भावय ॥

भर॰ । कष्टमद्यापि नोच्छ्वसितः[9] ॥ इति वीजयति[10] ॥

जनकः । समुच्छ्वस्य सर्वतो विलोक्य । हा हा[11] मुषितोऽस्मि ॥

दश॰ । उच्छ्वस्य[12] । वत्स रामभद्र न[13] गन्तव्यम्[14] ।

प्राणाः [15]पतन्ति परितस्तमसा वृतोऽस्मि
मर्मच्छिदो मम रुजः प्रसरन्त्यपूर्वाः ।
अक्ष्णोर्मुखेन्दुमुपधेहि गिरं च देहि
हा पुत्र मय्यकरुणः सहसैव मा भूः[16] ॥५६॥

---

[1] वत्स add. Mg only.

[2] मत्पद॰ for मत्पाद॰ E only.

[3] ॰स्पष्टि॰ for ॰स्पृष्टि॰ Cu, K only.

[4] ॰प्रतप्तौ for ॰प्रमूढौ E only.

[5] जटा E न·टा Sc नःटां I_2 त्वहं W जां Bo जटां cett.

[6] परिपूज्य for परिष्वज्य K only.

[7] ॰स्तंसं for ॰स्तम्भं K only.

[8] वत्स om. K only.

[9] नोत्ससः Bo नोच्छसितः Cu नोच्छ्वसितः cett.

[10] जयति for वीजयति E only.

[11] Om. one हा K only.

[12] उच्छ्वस्य om. Mt only.

[13] मा for न Mg न om. Md. Read न cett. (+Mt).

[14] २ add. I_1, Bo, W, Sc, I_2 only.

[15] प्रयान्ति for पतन्ति Mg only.

[16] भूत for भूः Bo only.

सोन्मादमिव [1]निर्भरम । भोः क्व प्रवि[2]शामीदानीं मन्द[3]भाग्यः ॥

इति [4]विक्लवो भरतजनकाभ्यां नीयमानो निष्क्रान्तः ॥

युधा° । [5]वत्स रामभद्र ।

एकीभूय [6]शनैरनेकसम[7]यव्युत्पन्नमेकक्रियं
मुक्ताक्रन्दमितस्ततः किमिदमित्युद्भ्रान्तनारीन[8]रम् ।
एतत्[9] त्वत्पुरमन्य[10]थैव सहसा सञ्जातमा[11]वेद्यते
यस्मिन् कर्दमितेषु[12] वर्त्मसु घनैर्बा[13]ष्पाम्बुभिर्दुर्दिनम् ॥५७॥

रामः । मातुल[14] प्रतिनिवर्तस्व । अयं च[15] वो हस्ते[16] भरतः ॥

युधा° । [17]अनुरुध्यस्व मामनुगच्छन्तम् ॥

रामः[18] । शान्तम्[19] । गुरवो यूयं[20] नानुगन्तारः । आत्मना तृतीयेन गन्तव्यमित्याम्नाया आदेशः ॥

युधा° । किमहमेकोऽनुगच्छामि । अपि तु सबालवृद्धाः प्रकृतयः । किं न पश्य[21]सि ।

---

1 निर्भरम् om. Mt. only.

2 °श्यसी° corr. to °शामी° Cu.

3 °भागधेयः for °भाग्य Mt only.

4 विक्लवो om. I_1 only.

5 वत्स रामभद्र Cu, E, Bo वत्स रामभद्र २ I_1, W, Sc, I_2, Md वत्स रामभद्र पश्य २ Mt, Mg वत्स रामचन्द्र २ K

6 शनै° changed to शतै° Cu शनै° cett.

7 °रनेकरसमप्युत्पन्न° Mt °रनेकरसमप्युत्सन्न° Mg °रनेकसमयव्युत्पन्न° cett.

8 °जनं for °नरम् Mg only.

9 हन्तैतत् for एतत्त्वत् Mt only.

10 °मन्यदेव for °मन्यथैव Mg only.

11 °मावेधते Md °मापद्यते Mt °मावेद्यते cett. (+Mg).

12 °तेऽश्रु for °तेषु Sc only.

13 बाष्पाम्बुभि . . . अनुरुध्यस्व (line 10) om. K.

14 मातुल E मातुल corr. to मातुल२ Cu मातुल२ cett.

15 च om. Bo only.

16 भरतो हस्ते for हस्ते भरतः Md, Mt, Mg only.

17 वत्स add. Mt, Mg only.

18 रामः । शान्तम् by rev. along margin, [Cu.

19 पापं शान्तं पापम् add. Mt, Mg only.

20 अनुगन्तव्याः add. Mg only.

21 पश्यन्ति for पश्यसि E only.

स्कन्धारोपितयज्ञपात्रनिचयाः स्वैर्वाजपेयार्जितै-
श्छत्रैर्वारयितुं [1]तवार्ककिरणानेते महाब्राह्मणाः ।
साकेताः सह [2]सैनिकैरनुपतत्पत्नीगृहीताग्नयः
प्राक्प्रस्थापितहोमधेनव इमे धावन्ति वृद्धा अपि ॥५८॥

रामः । मातुल[3] मातुल गुरुभिरेव शिशवो धर्मलोपात् पालयितव्याः । तत् [4]प्रसीद नः । प्रतिनिवृत्य[5] निवर्त्यतामयं महाजनः ॥

इति प्रणमति ॥

सुधा०[6] । वत्सोत्तिष्ठोत्तिष्ठ । एष[7] बोधयित्वा प्रजाः क्वापि मन्दभाग्यो गच्छामि ।

त्वां लक्ष्मण महाबाहो त्वां च वैदेहनन्दिनि ।
आमन्त्रये निवृत्तोऽस्मि पापः कल्याणमस्तु वाम् ॥५९॥

[8]रुदन् प्रतिनिवृत्य । अहो नु खलु भोः

प्रतिमन्वन्तरं[9] भूति[10]र्गीयमाना चरिष्यति ।
[11]प्रातःपवित्रं लोकाना[12]मियं चारित्र[13]पञ्जिका ॥६०॥

इति निष्क्रान्तः ॥

---

[1] तवा° changed to नका° Cu तवा° cett.

[2] मैथिलै° for सैनिकै° Mt, Mg only.

[3] मातुल K मातुल changed to मातुल२ by rev., Cu मातुल२ cett.

[4] प्रसीद् Cu, E, K प्रसीदत cett.

[5] प्रतिनिवृत्य निवर्त्यता° I_1, Bo, Cu, W, Sc, I_2 प्रतिनिवर्त्य वत्यता° E प्रतिवृत्य निवर्त्यता° Md प्रतिनिवर्त्यता° only Mg निवर्त्यता° only Mt प्रतिनिवर्त्य निवर्त्यता° K.

[6] सुधा° by rev. along margin, Cu.

[7] एष बोधस्त्वा Bo एष वो बोधयित्वा Mt बोधयित्वा only Mg एष बोधयित्वा corr. to एष वो वञ्चयित्वा Cu एष बोधयित्वा निवर्तयित्वा K एष वो वञ्चयित्वा cett.

[8] क्रन्दन् for रुदन् E only.

[9] °न्तरे for °न्तरं E only.

[10] °र्गीयि° changed to °र्जाय° Cu °र्गीय° cett.

[11] प्रायः for प्रातः Sc, Mt, Mg only.

[12] °नां प्रियं for °नामियं E only.

[13] चारित्रपञ्जिका K, E, Md चारित्र्यपञ्चिका W आचारमञ्जिका Mt चारित्रपञ्चिका cett. (+ Mg).

[1]लक्ष्म॰। कथितमार्यस्य शृङ्गवेरपुरवास्तव्येन निषादपतिना गुहेन तत्प्रदेशपर्यन्तावस्कन्दिनो वि[2]राधराक्षसस्य दुर्विलसितम् ॥

रामः। तेन हि विराधहतकोन्मथनाय सन्निकृष्टप्र[3]यागमनुषक्त-मन्दाकिनीपवित्रमेखलं चित्रकूटं नामाचलमुपेत्य

मुनिभिरुपजुष्टतीर्थां[4] [5]रक्षांसि निहत्य द[6]ण्डकां प्राप्य।
सन्निहितगृध्रराजं क्रमेण [7]यामो जनस्थानम् ॥६१॥

इति निष्क्रान्ताः[8] सर्वे ॥

॥ [9]चतुर्थोऽङ्कः ॥

---

[1] लक्ष्म॰ by rev. along margin, Cu.
[2] विरोध॰ for विराध॰ E only.
[3] ॰प्रयोग॰ Cu, I_2, Md, Mt, Mg ॰प्रयोग॰ corr. to ॰प्रयाग॰ W ॰प्रयाग॰ cett.
[4] ॰तीर्थं for ॰तीर्थां W, Sc only.
[5] हन्तुं रक्षांसि for रक्षांसि निहत्य Mg only.
[6] दण्डकं for दण्डकां E only.
[7] यो for यामो E only.
[8] निष्क्रान्ताः सर्वे om. E only.
[9] चारित्रं नाम add. all but Cu, E, K.

[1]ततः प्रविशति सम्पातिः[2] ॥

सम्पातिः । नूनमद्य [3]वत्सजटायुरभिवन्दनाय[4] मलयकन्दरकुलायमुपासीदति । तथा हि ।

पर्याय[5]क्षणदृष्ट[6]नष्ट[6a]ककुभः संवर्तविस्तारयो-[7]
नीहारीकृतमेघ[8]मोचितधुतव्यक्तस्फुर[9]द्विद्युतः ।
आरात्कीर्ण[10]खणत्खणी[11]कृतगुरुग्रावो[12]च्चयश्रेणयः
श्यैनेयस्य[13] बृहत्पतत्रधुतयः प्रख्या[14]पयन्त्यागमम् ॥१॥
[15]दूरोद्वेल्लित[16]वाडवस्य जलधेरुल्लोल[17]भिन्नाम्भसो
रन्ध्रैरापतितेन वेगमरुता[18] पातालमाध्मायते[19] ।

---

1 श्रीशं वन्दे begins E only. श्री begins W only.

2 सम्पातिः corr. to सम्पातिः२ by rev., Cu.

3 वत्स om. E only.

4 °वन्दनाय Cu, E, K °वादनाय cett.

5 पर्यायात् Mt पश्चाधः° Mg पयार्य° cett.

6 °दृष्ट° I_2 °वृष्ट° W, Sc °दृष्ट° cett.

6a °नष्ट° om. Bo only.

7 विस्तारणो° Sc विस्तारणो° corr. to विस्तारिणो° W निस्तारयो° Mt विस्तारयो° cett.

8 °मेघ° om. Bo only.

9 °स्फुट° for °स्फुर° Bo only.

10 °त्कीर्ण° corr. to °त्कीर्ण Cu °त्किर्ण° I_2 °त्कीर्ण° cett.

11 खणत्खणी° I_1, W, Sc, I_2 खणखणी° Cu खणीखणी° E, K खेणखणी° Bo खैरणू° Md कणाकणी° Mt कणात्कणी° Mg.

12 °ग्रासो° Sc °ग्रासो° corr. to °ग्रामो° W °द्वासो° E °ग्रामो° I_2 °ग्रावो° cett.

13 श्यैनैयस्य I_1 शैनेयस्य Cu, K, Md श्येनेयस्य Mt, Mg श्यैनेयस्य cett.

14 प्रत्या° for प्रख्या° E only.

15 अपि च add. Md, Mt, Mg only.

16 °ल्लासित° for °द्वेल्लित° Mt only.

17 °रुल्लोक° for °रुल्लोल° E only.

18 °मरुतां E only.

19 °ध्मातये E only.

यद् वैकुण्ठवराहकण्ठकुहरस्फारोच्चरद्भैरव-
ध्वानोच्चण्डमकाण्डकालरजनीपर्जन्यवद्गर्जति ॥२॥

प्रविश्य[1] जटायुः ।

कावेरीवलयितमेखलस्य साना-
वेकस्मिन्[2] मलयगिरेर्दिवः[3] पतामि ।
यत्रार्यो[4] निवसति काश्यपः शकुन्तः
शैलेन्द्रो[5]ऽपर इव विप्रयुक्तपक्षः ॥३॥
विस्रंसयन्ती[6] परिगृह्य[7] पक्षौ
जाता ममाप्युत्पतन[8]श्रमार्तिः[9] ।
शक्तिर्हि कालस्य विभोर्जराख्या
शक्त्यन्तराणां प्रतिबन्धहेतुः ॥४॥

तदयमार्यो मन्वन्तरपुराणगृध्रराजः सम्पातिः । [10]अहो भ्रातृस्नेहः[11] ।

पुराकल्पे दूरोत्पतनखुरलीकेलिजनिता-
दतिप्रत्यासङ्गात्परितपति[12] गात्राणि तपने[13] ।
अवष्टभ्यासौ मामुपरि ततपक्षः शिशुरिति
स्वपक्षाभ्यां प्लोषा[14]दविकलमरक्षत्[15] करुणया ॥५॥

---

[1] ततः प्रविशति for प्रविश्य Mg only.
[2] °वेत° for °वेक° Mt only.
[3] °र्दिवं Mt °र्दिवि corr. to °र्दिवः Cu °र्दिवः cett.
[4] °त्राद्यो for °त्रार्यो E only.
[5] शैलोऽत्रापर Md, Mg only.
[6] °यन्तौ Mt only.
[7] °वृत्य for °गृह्य Mt only.
[8] °तन° changed to °तने Cu °ततः Md, Mt, Mg °तन° cett.
[9] °श्रमाय for °श्रमार्तिः W only.
[10] आहो Sc, I_2 only.
[11] भ्रातुः स्नेहः E only.
[12] °तपन्ति E only.
[13] तपसे Mt only.
[14] मोहा° for प्लोषा° E only.
[15] After मरच Cu om. up to °स्निग्ध-निर्मलपरिसरा (p. 124, l. 14) and has अत्र सार्धपत्रत्रुटिः by rev. along margin.

उपसृत्य[1]। आर्य काश्यप। त्वां जटायुरभिवादये ॥

सम्पा०। एह्येहि वत्स।

त्वया पुत्रवती श्येनी गृध्राणां चक्रवर्तिना।
गरुत्मतेव वीरेण विनता नः पितामही ॥ ६॥

परिष्वज्य। वत्स जटायो। अपि[2] कालविप्रकर्षान्मन्दीभूतः पितृमरण[3]शोको रामभद्रस्य[4] ॥

जटा०। तस्य विद्यातपोवृद्धसंयोगः [5]स्वा च धीरता।
न्याय्यो रक्षाधिकारश्च दौर्मनस्यं व्यपोहति ॥ ७॥

सम्पा०। तृप्तैर्विराधमांसानां गृध्रैरावेदितं हि मे।
चित्रकूटाद्यथा रामः[6] शरभङ्गाश्रमं गतः ॥ ८॥
तदा च शरभङ्गेन हव्यवाहे[7] हुता तनुः।
अथोपसेदिवान् रामः[8] सुतीक्ष्णादीन् मुनीनपि ॥ ९॥

जटा०। बाढम्। अधुनागस्त्यवचनाद्रामः पञ्चवट्यां प्रतिवसति॥

सम्पा०। चिरात् स्मृत्वा। आः। अस्ति जनस्थाने पञ्चवटी नाम गोदावरीतटोद्देशः। वत्स जटायो विषयबाहुल्यं कालविप्रकर्षश्च नः[9] स्मृतिं मुष्णाति[10]।

कल्पस्यादौ मम परिचयस्तावदासीदुदस्याद्
यावद्विष्णोरुपरि चरणश्चारु[11]गङ्गापताकः।

---

1 उपश्रित्य I_1, I_2 उपाश्रित्य W, Sc उपश्रौत्य Bo उपसृत्य E, K, Md, Mg उपसृत्य om. Mt.

2 अयि W अति° Mt अपि cett.

3 °मरण° om. K only.

4 °भद्रस्य . . . मांसानां (l. 9) om. I_1 °भद्रः for °भद्रस्य Mt only.

5 सा च धीरता K सावधीरता E स्वावधीरता Bo स्वा च धीरता cett.

6 रामः om. E only.

7 °वाहेऽहुता Md, Mt, Mg only.

8 राम Bo नाम W, Sc रामः cett.

9 न I_1, Bo, I_2, Md नः E, K, W, Sc न om. Mg.

10 पुष्णाति Md, Mt प्रमुष्णाति K मुष्णाति cett.

11 °श्चानु° for °श्चारु° Bo, E, I_2 only.

पर्यन्तेष्वप्यवधिवलयस्तेजसां यावदद्रि-
लोकालोकः परि[1]कलयिता सप्तमस्याम्बुराशेः ॥१०॥

जटा॰। तत्रैकदा रघु[2]वृषं वृषस्यन्ती शूर्प[3]णखा प्राप्ता ॥

सम्पा॰। अहो निर्मर्यादता।

अनेकयुगजीविन्यास्त्रेता [4]यस्यास्त्रयोदशी।
सा क्षीरकण्ठं तं वत्सं ल[5]ज्जयन्ती न लज्जिता ॥११॥

जटा॰[5a]।

तस्याश्च कर्णनासो[6]ष्ठकर्तनेन[7] न्य[8]वीविशत्।
दशाननतिरस्कारप्रशस्ति[9]मिव लक्ष्मणः ॥१२॥

[10]सम्पा॰। तन्निमित्तकस्तर्हि कश्चिदनुब[11]द्धः परैरभियोगः ॥

जटा॰। वाढम्। एकेनैव च[12] रामभद्रेण

चतुर्दश सहस्राणि चतुर्दश च राक्षसाः।
त्रयश्च दूषणखरत्रिमूर्धानो [13]मृधे हताः ॥१३॥

सम्पा॰। आश्चर्यम्[14]। अथवा नाश्चर्यमेतद्दाशरथौ महत् पुनर-पावृतं वैर[15]द्वारमिति मन्यमानः सम्प्रमुग्धोऽस्मि। तद्[16] वत्स

---

[1] परिकलयिता E, W, Sc परिकलयतः I_1, Bo, K, Md परिकलयिताः I_2 परिसरगतः Mt.

[2] रघुनन्दनं W, Sc रघुवृषं I_1, K रघुं Bo रघु E, I_2 रघुवृषभं Md.

[3] शूर्पनखा E सूर्पनखा Md शूर्पणखा cett. (+ Mt, Mg).

[4] यस्य त्रयो॰ E only.

[5] वृषस्यन्ती for लज्जयन्ती Mt, Mg only.

[5a] Omits this line and the next, K only.

[6] ॰नासौष्ठ॰ for ॰नासोष्ठ॰ E only.

[7] ॰छन्तनेन for ॰कर्तनेन Mt only.

[8] न्यतीविशत् E न्यवीशसन् Md न्यवीविशत् cett. (+ Mt, Mg).

[9] ॰स्तिमपि for ॰स्तिमिव Mg only.

[10] सम्पा ... राचसाः (below, l. 12) om. I_2 only.

[11] ॰दनुवन्धः W ॰दवरुद्धः Md ॰दनुवद्धः cett. (+ Mt, Mg).

[12] च om. K only.

[13] रणे E मृधे om. K मृधे cett.

[14] Add one more आस्चर्यम् Mt, Mg only.

[15] वैरेमिति for वैरद्वारमिति E only.

[16] तद् वत्स जटायो om. Mt only.

जटायो नास्मिन्नवसरे सीतारामलक्ष्मणास्त्वया क्षणमपि मोक्तव्याः ।

स्वसुः सोदर्यायाः कथमिव निकारं दशमुख-
स्तथा भूयोभूयः स्वजनविनिपातं च सहते ।
मदान्धो मायावी प्रभुरमितवीर्योऽन्तिकचरः
सपत्नः कष्टं [1]भो निपुणमनुपाल्या हि शिशवः ॥१४॥

अहमपि समुद्रे कृताह्निकः शिवतातिपरिणतिमनुध्यास्यामि[2] ॥

इति निष्क्रान्तः ॥

जटा° । [3]उत्पत्य[4] गगनं[5]गमनमभिनीय ।

एषोऽहं प्रलयमरुत्प्रचण्डरंहः-
सङ्क्षिप्तप्रथिम पिबन्निवा[6]न्तरिक्षम् ।
क्षे[7]पीयो मलयगिरेर्निवासभूभृत्-
संसक्तक्षितिरुहजालमभ्युपेतः[8] ॥१५॥

अयमविरलानोकहनिवहनिर[9]न्तरस्निग्धनि[10]र्मलपरिसरार[11]ण्य-परिणद्धगोदावरीमुखरकन्दरः सततमभिष्यन्द[12]मानमेघमेदुरितनीलिमा जनस्थानमध्यदेशगो गिरिः प्रस्रव[13]णो नाम । इयं च पञ्चवटी । विभाव्य[14] । अये

---

[1] भो K, E नो cett.

[2] शिवतातिपरिणति° Bo, W, Sc, I_2, Mg वसेजातिपरिणति° I_1 शिवतातिपरिग्रसीतानुपरिणति° E रवजाति° Md सीतानुपरिणति° K.

[3] उपसृत्य add. K only.

[4] उत्पोत्पत्य E उत्प्लुत्य Mg उत्पत्य cett.

[5] गगन om. E, K only.

[6] °न्नेवा° for °न्निवा° Bo only.

[7] क्षेमीयो W, Sc द्वैतीयो Mt क्षेपीयो cett.

[8] °भ्युपैमि for °भ्युपेतः Mt only.

[9] °निरन्तर° E only.

[10] °नील° for °निर्मल° Mt, Mg only.

[11] Begins with रण्यपरिणद्ध° Cu.

[12] °मभिनिष्यन्द° W °मभिस्यन्द° K, Md °मभिष्यन्द° cett. (+ Mt, Mg).

[13] प्रश्रवणो Cu, Md प्रम्रवणो Sc, I_2 प्रस्रवणो cett. (+ Mt, Mg).

[14] विभाव्य om. Cu, Mg only.

दूरं हृतश्चित्रमृगेण रामस्
तया दिशा गच्छति लक्ष्मणोऽपि ।
ततः परिव्राडुटजं[1] प्रविष्टो
[2]विविक्तरूपो दशकन्धरोऽयम् ॥१६॥

[3]प्रमादः[4] प्रमादः ।
परःसहस्रैरायुक्तं पिशाचवदनैः खरैः ।
रथं वधूटीमारोप्य पापः [5]क्वाप्येष गच्छति ॥१७॥

[6]पौलस्त्य[7] ।—
धर्तारः प्रलयेषु ये भगवतो[8] वेदस्य विद्येश्वरा-[9]
स्तेषामन्वयसम्भवस्य[10] भवतः स्नातस्य वेदव्रतैः[11][12] ।
जेतुर्नैतलसद्मनोऽपि[13] तपसा [14]दृप्तस्य राज्ञः [15]सतो
निन्द्या दुश्चरिता[16][17] च नाभिजननी जाता कथं दुर्मतिः
॥१८॥

---

[1] °टज प्र° for °टजं प्र° E only.

[2] विविक्त° Cu, K धिग्व्यक्त° cett.

[3] अहो add. Mt, Mg only.

[4] प्रमादः प्रमादः I_1, E प्रमादः corr. to प्रमादः२ by rev., Cu प्रमादः only cett.

[5] कोऽप्येष E only.

[6] अरे add. E only.

[7] पौलस्त्य E, K पौलस्त्य changed to पौलस्त्य२ Cu पौलस्त्य२ cett.

[8] भगवद्देतो वैस्य I_1 भगवतो देवस्य Cu, E, K भगवतो वेदस्य cett.

[9] विश्वे° W, Sc वेद्दे° Mt, Mg विद्ये° cett.

[10] °केतनस्य for °सम्भवस्य Mt only.

[11] देव° for वेद° E only.

[12] Repeats रथं वधूटी . . . गच्छति, but effaces it with paint, Cu.

[13] जेतुर्नैतल° I_1, Cu, Md, I_2 जेतुनंवल Bo जेतुर्वैजल° W, Sc जेतुर्वैतल° Mt, Mg जेतुस्त्रैतल° E जेतुतल° K.

[14] दीप्तस्य Mt only.

[15] ततो for सतो Mt only.

[16] दुखरि° corr. to दुःखरि° Cu only.

[17] °तावतारजननी Mt °ता नाभिजननी Bo °ता नाभिजननी corr. to °ता च नाभिजननी by rev., W °ता च नाभिजननी cett.

कथमवज्ञया न शृणोतीव[1]। आः दुरात्मन् [2]नैर्ऋतापसद। तिष्ठ तिष्ठ।

तुण्डप्रोतशिरःकरोटिशि[3]खरा[4]कृष्टिस्फुरत्प्र[5]स्फुटत्-
क्लोमप्लीहयकृ[6]द्धृतोष्णरुधिरस्ता[7]म्यन्त्रजा[8]लस्य ते।
अत्युग्रक्रकचप्रचण्डनखरोत्कृत्तक्वणत्कीकसै-
रङ्गैः खण्डितकन्धराधमनिभिः श्येनीसुतस्तृप्यतु ॥१९॥

[9]इति निष्क्रान्तः।

॥ विष्क[10]म्भकः ॥

प्रविश्य[11] लक्ष्मणः। हा[12] आर्ये। [13]क्वासि। [14]कष्टं दशाविपा[15]कमनुभवत्यार्यो [16]मारी[17]चात्।

एष [18]मूर्त इव क्रोधः शोकाग्निरिव जङ्गमः।
कृच्छ्राद्बिभर्ति हृल्ले[19]खलज्जासं[20]वेगिनीं तनुम् ॥२०॥

---

1 शृणोति for शृणोतीव Mt only.
2 नैर्ऋता° Cu, K, W ऋता° Bo नैऋता° cett.
3 °विवरा° for °शिखरा° Mt only.
4 °कृष्ट° for °कृष्टि° Mt only.
5 °त्प्रस्फुट° Cu, W, Sc, I$_2$ °त्त्वक्सृ-भ्रात् Mt °त्प्रस्फुटत्° cett.
6 °द्धृतो° I$_1$, K, Md °द्गतो° W, Sc °द्धतो° Cu, I$_2$ °द्धृतोष्ठ° Mt °द्भृतो° Bo. Reads °यक्नातद्धतोच्च° for °यकृद्धृतोष्ण° E.
7 °म्यान्त्र° Md, Mt, Mg only.
8 °मालस्य Mt only.
9 इति om. all but K, Md, Mt, Mg.
10 विष्कम्भः E विस्कम्भः Cu शुद्धविष्कम्भः Mt, Mg विष्कम्भकः cett.
11 ततः प्रविशति for प्रविश्य Mg only.
12 हा आर्ये om. Bo only.
13 क्वापि E only.
14 कष्ट for कष्टं E only.
15 °परिपाक° K °विपाक° cett. °विपाकाचार्यो for °विपाकमनुभवत्यार्यो Bo.
16 भगवान् add. W, Sc only अयं add. Md, Mt, Mg only.
17 मारीचात् om. W, Sc मारीचशत्रुः Mt, Mg मारीचात् cett.
18 मूर्ति W only.
19 °ज्वलत्° W, Sc °लज्जा° om. E °लज्जा° cett.
20 संवेगिनी E, K संवेगिनां Sc सन्देशिनीं Mt संवेगिनीं cett.

तथा[1] हि ।

आभु[2]ग्नभ्रु[3]कुटीविटङ्कघटनासंसूचितान्तः[4]स्फुर-
द्वैर्यस्तम्भितदुर्व्यवस्थविततप्रोच्चण्डकोपानलः ।
उद्भू[5]मावलिरम्भसामिव निधिर्म[6]ध्यज्वलद्वाडवो
विद्यु[7]द्व्यञ्जितवज्रगर्भजलदच्छायां समालम्बते ॥२१॥

ततः प्रविशति रामः ॥

रामः ।

[8]न्यक्कारो हृदि व[9]ज्रकील इव मे तीव्रः[10] परिस्प[11]न्दते
घोरे[12]ऽन्धे तमसीव मज्जति मनः सम्मीलितं लज्जया ।
शोकस्तातविपत्तिजो [13]दहति मां नास्त्येव यस्मिन् क्रिया
मर्मा[14]णीव पुनर्भि[15]नत्ति करुणा सीतां वराकीं प्रति ॥२२॥

लक्ष्म० । [16]आर्य आर्य । न खलु लोको[17]त्तरकर्माणस्त्वादृशाः प्रमुह्यन्ति कृच्छ्रेषु ॥

---

[1] तथा हि om. Bo, W, Sc only.

[2] आभूम० W, Sc आविग्न० Mg भुग्न० Bo आभुग्न० cett.

[3] ०भ्रकुटी० W ०भृकुटी० E, Sc ०भ्रुकुटी० cett.

[4] ०तान्त० E ०ताङ्ग० Bo ०तान्तः० cett.

[5] उद्भूमावलिरम्भसामिव om. Bo only.

[6] ०र्मध्ये ज्व० E, K only.

[7] विद्यद्व्ञ्जित० corr. to विद्वद्व्ञ्जित० Cu वियुधञ्जित० Bo विद्युद्वेल्लित० E विद्युद्व्यञ्जित० cett.

[8] न्यक्कारो *om. Bo only.*

[9] वल्ल० Bo तप्त० W, Sc वज्र० cett.

[10] तोदः W, Sc तीव्रः cett.

[11] ०स्यन्दते Sc ०स्फान्दशे Bo ०स्पन्दते cett.

[12] घोरधे Bo घोरान्धे K घोरेऽन्धे cett.

[13] वहति Cu, I_2 वह E दहति all cett. but Bo, which om. दहति मां.

[14] ०ण्येव W, Sc ०णीव cett. व पुनर्भिनत्ति . . . कर्माणि (p. 128, l. 1) by rev. along margin, Cu.

[15] पुनश्छिनत्ति for पुनर्भिनत्ति Mt, Mg only.

[16] आर्य E, K आर्य आर्य cett.

[17] लोकान्तर० Bo only.

रामः। वत्स लोकोत्तराण्येव कर्माणि रामस्य[1]।

यैर्गुप्तान्य[2]कुतोभयानि भुवनान्यासन् महाभीषव[3]-
स्ते सूर्यान्वयकेतवो[4] नृपतयः पूर्वे तिरस्कारिताः[5]।
कल्पान्तेष्[6]वपि यः स्थितः[7] स गमितः साधुर्जटायुर्दिवं[8]
पत्नीं हारयता वने यदकृतं लोकैः कृतं तन्मया ॥२३॥

[9]हा तात काश्यप शकुन्तराज। क्व पुनस्त्वादृशस्य[10] महतस्तीर्थ[11]-भूतस्य साधोः सम्भवः॥

लक्ष्म०। पश्यामीव[12] तां पश्चिमावस्थां[13] तातस्य। —

यामोषधिमिवायुष्मन् विचिनोषि[14] वने[15] वने।
सा सीता[16] मम च प्राणा रावणेनोभयं हृतम् ॥२४॥

इत्येतदेवाभिधाय[17] वीरलोकमधिष्ठित[18]स्तातः॥

[18a]रामः। वत्स[19] हृदयमर्माविधः[20] खल्वमी कथोद्घाताः॥

---

[1] रामस्य om. Mt only.

[2] ०प्तानि कुतो० corr. to ०प्तान्यकुतो० Cu.

[3] ०भीषव० K, E, Bo, Md ०भीराव० corr. to ०भीरव० Cu ०भीरव० Sc ०भी-रान० I_2 ०भीशव० I_1, W, Mt, Mg.

[4] ०केतोर्ङ्कि for ०केतवो Bo only.

[5] पविचाशयाः for तिरस्कारिताः Md only.

[6] For the last two lines of the verse अद्याहं जनकात्मजामिह वने दत्वासुरेभ्यः पुनः तं वंशं सुतरां कलङ्कविकलं कृत्वा प्र . . . read by Md only.

[7] स्थिरः Mt, Mg only.

[8] ०र्दिवे E only.

[9] कथं पक्षिराजः। उपसृत्य add. Md only.

[10] ०स्तादृशस्य E, Bo only.

[11] महातीर्थ० E only.

[12] पश्यामि for पश्यामीव Mt only.

[13] ०मावस्थां K, E, W, Md, Mt, Mg ०मामवस्थां cett.

[14] ०नोमि Mt only.

[15] महावने for वने वने Mt, Mg only.

[16] देवी for सीता Mg only.

[17] इत्येवमभि० for इत्येतदेवाभि Mg only.

[18] ०लोके गतस्तातः for ०लोकमधिष्ठित-स्तातः E only.

[18a] रामः। . . . कथोद्घाताः om. E.

[19] वत्स K, Bo वत्स corr. to वत्स २ Cu वत्स वत्स cett.

[20] ०मर्माभिधः K, Bo ०मर्मभिदः Mt, Mg ०मर्माविधः cett.

[1]लक्ष्म॰। अथ किम् ॥

रामः। किं हि नामैतत्[2] करिष्यते यदेतावतः परिभवातिप्रसङ्ग[3]स्य[4] तुल्यं स्यात्।

प्रागेव राक्षसवधाय मतिः स्थिता मे
वध्या हि ते बहुभिरेव [5]यतो निमित्तैः।
तन्मात्रके त्विह[6] [7]कृतेऽपि कुतः[8] शमो[9] मे
कृत्यं कुलस्य कदनात्[10] परतश्च[11] नान्यत् ॥२५॥

[12]तथापि वत्स।

प्रचण्डपरिपिण्डितः[13] स्तिमितवृत्तिरन्तर्मुखं[14]
पिबन्निव मुहुर्मुहुर्झटिति मन्युरुच्चैर्ज्वलन्।
शिखाभिरिव निश्चरन्[15]ननुपलब्ध[16]दाह्यान्तरः[17]
पयोधिमिव वाडवो दहति मामत[18]स्त्रायताम् ॥२६॥

---

[1] For this speech and the next read as follows: लक्ष्म॰। अथ किम्। रामः। किं हि &c. Mg रामः। अथ किम्। किं हि &c. E, Mt. Orig. लक्ष्म॰। अथ किम्। रामः। किं हि &c. corr. by rev. to लक्ष्म॰। अतस्तस्मिन् दुरात्मनि सर्वप्रकारेण वैरानृण्यमुपगच्छावः। अथ[२] किम्। रामः[१]। किं हि &c. Cu लक्ष्म॰। अतश्च (आतश्च Bo; अतश्च K, W, Sc, Md) तस्मिन् दुरात्मनि सर्वप्रकारेण वैरानृण्यमुपगच्छावः। रामः। अथ किं। किं हि &c. Bo, W, Sc, K, Md लक्ष्म॰। अतश्च (आतश्च I_1) तस्मिन् दुरात्मनि सर्वप्रकारेण वैरानृण्यमुपगच्छावः। रामः। अथ किं। राम। किं हि &c. I_1, I_2.

[2] नाम तत् for नामैतत् Bo only.

[3] ॰भवातिशप्र॰ Mt ॰भवस्तेप्र॰ I_2 ॰भवातिप्र॰ cett.

[4] ॰सङ्ग॰ *corr. to* ॰सङ्गस्य॰ *by rev.*, Cu.

[5] ततो for यतो E only.

[6] न्विह Cu, Bo, Sc, I_2 न्विह corr. to त्विह W त्विह cett.

[7] हृते for कृते Md, Mt, Mg only.

[8] हृतः for कुतः Mt only.

[9] समा मे corr. to शमो मे Cu समाप्तं K शमो मे cett.

[10] शमनात् Mt only.

[11] परस्य E only.

[12] तथा हि for तथापि Mt only.

[13] ॰पिण्डितः E, K, I_2 ॰पण्डित॰ Md ॰पिण्डित॰ cett. (+ Mt, Mg).

[14] ॰र्मुखं Cu, K wanting Bo ॰र्मुखः all cett.

[15] निस्वल॰ Mt only.

[16] ॰नुपसलब्ध॰ W ॰नूपलभ्य॰ Cu ॰नुपच्च॰ I_2 ॰नुपलभ्य Mt ॰नुपलब्ध॰ all cett.

[17] ॰वाह्या॰ for ॰दाह्या॰ E only.

[18] मर्ममित॰ *for* मामत॰ K *only*.

लक्ष्म॰। [1]एतान्यतिसम्भ्रान्तविविधमृगयूथान्युन्मत्तचण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराण्यरण्यानि दक्षिणां दिशमभिवर्तन्ते। [2]तदेभिरेव पथिभिर्भवावः[3]॥

रामः। [4]अदृष्टपूर्वाः[5] खल्वमी जनस्थानविभागाः[6]॥

लक्ष्म॰। ननु तदेव[7] तातमारुणिं[8] गृध्रराजमग्निसात्कृत्य[9] निर्गतयोः[10] पञ्चवट्याश्रमादावयोः कोऽपि कालो[11] वर्तते [12]यतो दूरविच्छिन्नाः सम्प्रति जनस्थानसीमानः। यथा चैतान्यग्रतः प्रतिभयजननान्यरण्यानि[13] तथा [14]नूनमसौ जनस्थानपश्चिमः[15][16] कुञ्जवान्[17][18] नाम भवेत् दनुकबन्धाधिष्ठितो[19] दण्डकारण्यविभागः॥

रामः[20]। द्रष्टव्य एव स दुरात्मा कान्तारमण्डूकः॥

नेपथ्ये। कः कोऽत्र भोः। [21]परित्रायतामनेन[22] राक्षसकबन्धेनानुकृष्यमाणामरण्ये[23][24] स्त्रियम्।

---

[1] एतान्येव हि W, Sc   एतान्यहि I_2 एतान्यति॰ all cett.

[2] तदेव for तदेभिरेव Sc only.

[3] ॰र्भावः Bo   ॰र्विभावयामः Mt   ॰र्भवावः cett.

[4] वत्स add. Mt only.

[5] अदृष्टः पूर्वाः Bo   अदृष्टः पूर्वः E   अदृष्टपूर्वाः cett.

[6] ॰भागः E, I_2 only.

[7] तदेव E   तथैव Mt   तदैव cett.

[8] तातमारुणीं W   मारितं Mt   तातमारुणिं cett.

[9] ॰मात्मसा॰ for ॰मग्निसा॰ Bo only.

[10] निर्यातयोः Md, Mg only.

[11] कालोऽतिवर्तते Sc   कालो निवर्तते W   कालो वर्तते cett.

[12] यदा for यतो W, Sc, I_2 only.

[13] ॰भयजनानन्य॰ Bo, I_2 ॰भयजनान्य॰ Sc   ॰भयजन्यान्य॰ corr. to ॰भयजननान्य॰ Cu   ॰भयजनानन्य॰ corr. to ॰भयजननान्य॰ W   ॰भयजननान्य॰ cett.

[14] नियतम॰ for नूनम॰ Mg only.

[15] जनस्थान om. Mg only.

[16] पश्चिमतः for ॰पश्चिमः Mg only.

[17] कुञ्जर॰ for कुञ्ज॰ Mt, Mg only.

[18] ॰वान्न भव E   ॰वान्न भव corr. to वान्नाम (om. भवेत्) Cu   ॰वान् नाम भवेत् K   ॰वान् नाम only, cett.

[19] ॰दनुज॰ for दनु॰ E only.

[20] रामः om. Mt only.

[21] One more परित्रायतां added by all but Cu, K.

[22] दुरात्मना added by all but K   दुरात्मना added by rev. along margin, Cu.

[23] ॰नानुकृष्य॰ Cu, K   ॰नाकृष्य॰ cett.

[24] ॰रण्यस्त्रियं Md, Mt, Mg only.

[1]अहं हि श्रमणा[2] नाम सिद्धा[3] शबरतापसी ।
मतङ्गाश्रमवास्तव्या रामान्वेषिण्युपागता[4] ॥२७॥

रामः । वत्स लक्ष्मण गच्छ[5] ॥

[6]लक्ष्म० । एष गतोऽस्मि ॥ इति निष्क्रान्तः ॥

रामः ।

प्रिये हा हा[7] क्वासि प्रकिर मधुरां वाचमथवा
परामृतैरित्थं विलपनविनोदोऽप्यसुलभः ।
अनिन्द्यः पौलस्त्यो व्रजतु[8] परिवादो मयि पुनर्
[9]यतो [10]रूढे वैरे बहुगुणमनेन प्रतिकृतम्[11] ॥२८॥

ततः प्रविशति लक्ष्मणः श्रमणा[12] च ॥

लक्ष्म० । तत् क्रूरदन्तकरपत्रनिकृत्तसत्त्व-
सङ्घातनिःसरदसृक्[13]प्लुत[14]कूर्चगुच्छम् ।
वक्त्रं वपुश्च विकृताकृति[15] दीर्घबाहो-
रार्येण राक्षसकुतूहलिना न दृष्टम् ॥२९॥

आर्ये श्रमणे[16] । अयमार्यः[17] ॥

---

[1] इयं for अहं E only.
[2] श्रमणा all.
[3] सिद्धशवर० E only.
[4] ०पागतं Cu, Bo ०पगता W ०पागता cett.
[5] गच्छ K, E गच्छ corr. to गच्छ२ Cu गच्छ२ cett.
[6] लक्ष्म० । . . . श्रमणा च (l. 10 below) om. Mt only.
[7] हा देवि प्रकृतिमधुरां for हा क्वासि प्रकिर मधुरां Mg only.
[8] भजतु E only.
[9] गतो for यतो W, Sc only.
[10] रूढं वैरं K रूढे वैरं corr. to रूढे वैरे Cu रूढे वैरे cett.
[11] प्रतिकृतं K, Md, Mt, Mg प्रविकृतं cett.
[12] श्रवणा K, Md, Mt श्रमणा cett.
[13] सम्पातितसरद० for सङ्घातनिःसरद० Mg only.
[14] ०दसृस्रुत० Bo ०दसृक्स्रुत० corr. to ०दसृक्पत० Cu ०दसृप्लुत० I_2 ०दसृक्प्लुत० cett.
[15] ०कृत for ०कृति W only.
[16] श्रमणे all.
[17] ०मर्या: for ०मार्यः Bo only.

श्रमणा। जयतु[1] देवः ॥

रामः। [2]अथास्मत्पर्यन्वेषणे किं प्रयोजनम् ॥

[3]श्रम०। शृणोषि रावणानुजं विभीषणम् ॥

रामः। कस्तं[4] न शृणोति ॥

श्रम०। स च [5]यद्देव देवेन खरदूषणप्रभृतयो[6] निहतास्तदैव बन्धुभ्यः कस्यापि हेतोः परिक्रम्य[7] सुग्रीवसख्यादृष्यमूके[8] [9]वर्तते। तस्यायमात्मसमर्पितो[10] लेखः ॥ इति लेखमर्पयति ॥

लक्ष्म०। गृहीत्वा वाचयति। स्वस्ति[11] रामदेवं [12]प्रणम्य विभीषणो विज्ञापयति।

विश्लिष्टभागधेयानां[13] द्वयी[14] नः परमा गतिः।
धर्मः प्रकृष्यमाणो वा गोप्ता धर्मस्य वा[15] भवान् ॥ ३० ॥

रामः। वत्स ब्रूहि किं [16]सन्दिश्यतामेवंवादिनः प्रियसुहृदो लङ्केश्वरस्य [17]तत्रभवतो महाराजविभीषणस्य ॥

---

[1] जयतु Cu, K, Mg जयतु२ E जय Bo जयति२ cett.

[2] आर्येऽस्मत्° E, Bo, W, Sc, I_2 अस्मत्° only Mt, Mg अथास्मत्° cett.

[3] श्रम०। . . . शृणोति (next line) om. Bo.

[4] कथं for कस्तं E only.

[5] यद्देव देवेन Cu, K, Mt यद्देव वृत्तेन E देवो न यद्देव Bo यद्देव only Mg दैवाद्यदैव cett.

[6] °त्रिशिरसो for °प्रभृतयो Mt, Mg only.

[7] अपक्रम्य for परिक्रम्य Mt only.

[8] °दृष्यमूकेन Cu °दृश्यमूके I_1, Bo, Mt, Mg °दृष्यमूके cett.

[9] दृश्यते for वर्तते Mg only.

[10] °मात्मसमस्तसमर्पितो ल्लेखः Cu °मात्मसमस्तसमर्पितो लेखः K °मात्मसमर्पितो लेखः cett.

[11] स्वस्ति om. Cu, K only.

[12] प्रणम्य om. Mt only.

[13] विशिष्ट° for विश्लिष्ट° K only.

[14] द्वीपिनः for द्वयी नः E only.

[15] वै for वा E, W, Sc, I_2.

[16] सन्दिश्य° Cu, K प्रसन्दिश्य° Bo प्रतिदिश्य° Sc प्रतिसन्दिश्य° cett.

[17] तत्रभवतो om. Mt तत्रभगवतो K तत्रभगवतो corr. to तत्रभवतो Cu तत्रभवतो cett.

लक्ष्म॰ । यदा लङ्केश्वरः प्रियसुहृदित्युक्तमार्येण तत् किमवशिष्यते सन्देशस्य ॥

रामः । यथाह[1] सौमित्रिः ॥

श्रम॰ । अनुगृहीताः[2] स्मः ॥

लक्ष्म॰ । आर्ये [3]श्रमणे । कथय विभीषणसम्पर्कादस्ति काचिदार्यायाः प्रवृत्तिः ॥

[4]श्रम॰ । वर्तमाने नास्ति । यदा पुनर्दुरात्मना रावणापसदेना[5]प[6]ह्रियमाणायाः स्रस्तमन[7]सूयानामाङ्कमुत्तरीयं[8] तच्च[9] तैर्गृहीतम् ॥

रामः । हा प्रिये महारण्यवा[10]सप्रियसखि विदेहरा[11]जनन्दिनि ॥

इति संवरणं नाटयति ॥

लक्ष्म॰ । [12]आर्ये केन कस्य वा हेतोस्तद्गृहीतम् ॥

श्रम॰ । [13]ऋष्यमूके रामगुणपक्षपातात् सुग्रीव[14]विभीषणह[15]नूमत्प्रभृ[16]तिभिः ॥

रामः । [17]द्रष्टव्या हि निष्कारणप्रि[18]यकारिणो भुवनमहनीयमहि-

---

1 वाढं for यथाह सौमित्रिः Cu (by rev. along margin), K only.

2 ॰ताः स्मः Md, Mt ॰ताः स्म K ॰तास्मि Mg ॰तास्मः cett.

3 श्रमणे all.

4 श्रमणा by rev. along margin, Cu.

5 रावणेनाप॰ Mt, Mg राचसापसदेनाप॰ (prob. corr. fr. रावणापसदेना॰) Cu रावणापसदेनाप॰ cett.

6 ॰हृतायाः for ॰ह्रियमाणायाः Mg only.

7 ॰मनुसूया॰ E only.

8 ॰रीयान्तरिताभरणजालं for ॰रीयं Mt only.

9 तच्च om. Mt only.

10 स only for ॰वास॰ Cu.

11 ॰राज॰ om. E only.

12 आर्ये om. Mt only.

13 ऋस्य॰ I_2 ऋश्य॰ Mt, Mg ऋष्य॰ cett.

14 ॰विभीषण॰ om. Cu, K only.

15 हनु॰ for हनू॰ E, W, Sc only.

16 ॰भृतिना K ॰भृति corr. to ॰भृतिना by rev., Cu ॰भृतिभिः cett.

17 वत्स add. Mt, Mg only.

18 ॰क्रिया॰ for ॰प्रिय॰ Mt only.

मानस्ते महात्मानः । तच्च[1] सीतावासः श्रुतमभिज्ञानम् । तदृ[2]ष्यमूकमभिसन्धाय तावद् गच्छा[3]मः ॥

श्रम॰ । इत[4] इतस्तर्हि देवः ॥ परिक्रामन्ति[5] ॥

लक्ष्म॰ । हनू[6]मान् हनूमानिति[7] महानेष[8] वीरवादः । तत्रभवतो जातमात्रस्य सतः[9] समु[10]द्भ्रान्तदेवासुराण्य[11]द्भुतोदाहरणान्यनुश्रूयन्ते । अपि च किल ।

य[12]द्वज्रकर्षणे वीर्यं यद्वायौ वा[13] समु[14]न्नते ।
यद्वालिनि महाबाहौ तच्च[15] वीरे हनू[16]मति ॥३१॥

श्रम॰ । एवमीदृशो हेमगिरिवास्त[17]व्यस्य तत्रभवतः प्लव[18]ङ्गपुङ्गवानीकवृद्धयूथपतेः केसरिणः क्षेत्रसम्भवः[19] सूनुराञ्जनेयो ह[20]नूमान्

---

[1] तच्च सीतावास स्रुतम॰ I_1 तच्च सीतावासश्रुतम॰ corr. to तच्चसीतावस्त्रं ध्रुवम॰ Cu तच्च सीतावास । श्रुतम॰ Bo तच्च सीतावासः श्रुतम॰ E तच्च सीतावास श्रुतम॰ I_2 तच्च सीतावासश्रुतम॰ corr. to तच्च सीतावासप्रच्युतम॰ W तच्च सीतावासस्रुतम॰ Sc तच्च सीतावासस्वतम॰ Md तद्वत्स तस्याः संस्तुतम॰ Mt, Mg तच्च सीभस्त्रं ध्रुवम॰ K.

[2] तदृश्य॰ I_1, Bo तदृश्य॰ corr. to तदृष्य॰ Cu तदृष्य॰ cett.

[3] गच्छामः for गच्छावः Cu, K only.

[4] इत om. Md only.

[5] परिक्रीमतः Bo परिक्रामन्ति K, Md, Mg सर्वे परिक्रामन्ति Mt प्ररिक्रामति cett.

[6] Om. one हनूमान् E, W, Sc, I_2, Md only.

[7] इति महान् om. Md only.

[8] महानयं for महानेष Mt, Mg only.

[9] तस्य W, Sc, I_2 सतः om. E सतः cett.

[10] समुद्भूत॰ for समुद्भ्रान्त॰ K only मुद्भ्रान्तदेवा॰ om. Bo only.

[11] ॰राण्याश्चर्यान्य॰ for ॰राण्यद्भुतोदाहरणान्य॰ Mt only.

[12] यद्वज्राकर्षणे W, Sc यद्वर्जक्रर्षणे Bo यद्वज्रलक्षणे Mt यद्वज्रकर्षणे cett.

[13] वा om. E only.

[14] ॰न्नते K ॰न्नतं I_1, Mt ॰न्नतिः cett.

[15] तत्र for तच्च Cu only.

[16] हनु॰ for हनू॰ K, Bo only.

[17] ॰व्यः for ॰व्यस्य K only.

[18] प्लवङ्गानीक॰ Bo only.

[19] तत् add. K only.

[20] हनु॰ K, Sc only.

नाम । यस्य रेतोधाः पिता [1]भगवान् मातरिश्वा । तत् किं [2]हनूमतैकेन ।

अम्भोधेर्[3]नारिकेलीरसमिव चुलुकै[4][5]रुच्चुलुम्पन्त्यपो ये
येषामुत्क्षेपहेतुः[5a] शिखरिषु ल[6]कुचोदुम्बरप्राय एकः[7] ।
[8]ब्रह्मस्तम्बं निवासद्रुममिव रभसाद्विप्रकर्तुं क्षमा ये
तेषां कोट्यो[9]ऽप्यसङ्ख्याः सुतममरपतेर्वानराणां [10]नमन्ति
॥३२॥

रामः । [11]आर्ये ह[12]स्तदक्षिणेन [13]सुमहानग्नि[14]सञ्चयः । तत्किमेतत् ॥

श्रम० । [15]लक्ष्मणकुमारेण तस्य[16] योजनबाहोश्चि[17]तेयमभिसृष्टा ॥

रामः । साधु[18] कृतम् ॥

---

[1] भतान् I_2 only.

[2] हनु° Cu, E हनु° corr. to हनू° K हनू° cett.

[3] °र्नारिकेली° Cu, K, Bo, Sc, Mt, Mg °र्नालिकरी° E °र्नालिकेली° cett.

[4] चुलकै° I_1, K, E, I_2 चुलुकै° cett.

[5] °रुच्चुलम्पन्त्यपो I_2 °रुच्चुलुम्पत्पयो Cu °रुच्चलुम्पत्पयो Bo °रुच्चलिम्पन्त्यपो W °रुच्चुलुम्पन्त्ययो Sc °रुच्चुलुम्पन्त्यपो Md °रुच्चलुम्पत्पयो I_2 °राम्रुलुम्पत्पयो E °राम्रुलुम्पत्यपो K °रुद्विलिम्पन्त्यापा Mt °रुद्विलिम्पन्त्यपो Mg.

[5a] °लीला for हेतुः Mt only.

[6] लकु° K, E लिकु° corr. to लकु° Cu लिकु° cett.

[7] एव K एकः Cu, Bo एषः corr. to एकः I_1 एषः cett.

[8] विप्रः for ब्रह्म° Md only.

[9] ह्य° for °प्य° E only.

[10] नयन्ति E, I_2 only.

[11] आर्ये om. E only.

[12] हस्तं द° Cu हन्त द° Mt, Mg हस्तद° cett.

[13] सु om. E only.

[14] °नस्थि° for °नग्नि° Mt only.

[15] लक्ष्मण कुमारेण corr. to लक्ष्मणेन कुमारेण Cu कुमारलक्ष्मणेन K लक्ष्मणेन only Mt, Mg लक्ष्मणकुमारेण cett.

[16] मारितस्य for तस्य K only.

[17] °यमिति° for °यमभि° Mt only.

[18] साधु Cu, E, K, I_2 साधु२ cett.

लक्ष्म°। [1]आर्य पश्य पश्य।

[2]सौहित्यात्पृथवः क्वथन्ति रुधिरोत्सेकाश्चमत्कारिण-
ष्टा[3]त्कारोत्कट[4]मुच्चरन्ति नलकास्त्वङ्मांसविस्रंसनात्।
उत्सर्पन्त्यथ मेदसां वि[5]कलनादुद्बुद्बुदा[6] वीचय-
श्चित्रं चित्रमुदेति कोऽप्ययमितो दि[7]व्यः श्मशा[8]नालयात्
॥३३॥

प्रविश्य[9] पुरुषः। जयतु[10] जयतु रामदेवः।

दनुर्नाम श्रियः[11] पुत्रः शापाद्राक्षसतां गतः।
इन्द्रा[12]स्त्रकृतकाबन्ध्यः [12a]पूतोऽस्मि भवतः[13] श्रयात् ॥३४॥

रामः। [14]प्रियं नः॥

दनुः। राम[15] माल्यवत्प्र[16]युक्तेन च मया युष्मदा[17]सादनाय दूषितमरण्यमासीत्। [18]अलं वा तत्काल[19]काश्मल्य[20]स्मरणेन। सम्प्रति

---

[1] आर्य पश्य K, Bo आय पश्य corr. to आश्चर्य पश्य Cu आर्य पश्य२ cett.

[2] साहि° Bo only.

[3] °ष्टात्कारो° corr. to °ष्टाङ्कारो° W °ष्टात्कारो° cett.

[4] °मुच्चरन्ति K, E, Mt °मुत्क्वति corr. to °मुच्चरन्ति Cu °मुत्कटन्ति cett.

[5] विलयना° for विकलना° Mt only.

[6] °दानां चय° for °दा वीचय° W, Sc, I_2 only.

[7] दिव्य° I_1, E, Cu, W दिव्यः cett.

[8] °नानलात् for °नालयात् Mt, Mg only.

[9] दिव्यपुरुषः for पुरुषः all but Cu, K.

[10] जयतु जयतु Cu, E, K जयति जयति cett.

[11] श्रेयं पुत्रः Bo श्रिया युक्तः W, Sc श्रियः पुत्रः cett.

[12] स्त्रकृत . . . रण्यमासीत् (l. 12 below) om. I_2.

[12a] पूतोऽहं E मुक्तोऽस्मि Mg पूतोऽस्मि cett.

[13] भवतः श्रयात् Cu भवतां शरात् Md भवदाश्रयात् Mt, Mg भवतः शरात् K भवतां श्रयात् cett.

[14] प्रियं नः२ E प्रियं Cu, K प्रियं प्रियं नः cett.

[15] राम om. all but Cu, E, K.

[16] °मुक्तेन for °युक्तेन E only.

[17] °दासन्दनाय Mt only.

[18] अलं वा तत्काल° om. Mt only.

[19] °काश्मल° Cu (corr. fr. °काश्मल्य°), E °कौशल्य° W, Sc °कास° K °काश्मल्य° cett.

[20] °मरणेन for स्मरणेन E only.

[1]तु युष्मत्प्रभावात् प्रबुद्धसह[2]जज्योतिषः परो[3]क्षमेव मे वस्तु किञ्चि[4]त् प्रतिभाति। तच्च वः प्रति[5]बोधनाय कृतमहोपकारेभ्यः कथ्यते।

प्रार्थ्य माल्यवता वाली युष्म[6]द्वाते नियुज्यते।
तेनापि रावणे मैत्रीमनुरुध्य व्यपे[7]क्ष्यते ॥३५॥

रामः[8]। एष एव पन्थाश्चारि[9]त्रस्थानाम्।

[10]नैतादृशः सुहृत्कार्ये माध्य[11]स्थ्यमवल[12]म्बते।
ममाप्यस्मिन् महावीरे[13] सोत्कण्ठमिव मानसम् ॥३६॥

इतरे[14]। क्वान्यत्र रामदेवाद[15]मून्यक्षराणि[16] ॥

रामः। भद्र[17] कृतं सौजन्यम्। [18]अधुना चिरं[19] नन्दतु[20] महा[21]भागः स्वेषु[22] लोकेषु ॥ [23]इत्युनिष्क्रान्तः ॥

---

[1] तु om. E, Bo only.

[2] °सहजज्योति Cu सहजज्योतिषः corr. to सहजञ्ज्योतिषः W सहज्योतिषः Sc सजज्योतिषः Bo सहजज्योतिषः cett.

[3] °मिव मे वस्तु K, Mt °मेव मे वस्तु corr. to °मेवमेव Cu °मेवास्तु Md, Mg °मेव वस्तु cett.

[4] किञ्चिदत्र W, Sc किञ्चिच Md किञ्चित् Mt, Mg किञ्चिन्न cett.

[5] प्रविवोधनाय Cu प्रतिविधानाय Mt प्रतिवोधनाय cett.

[6] युष्मद्वार्ते Sc only.

[7] व्यपेचते corr. to व्यपेच्यते W व्यपच्यते Bo व्यपेचते E, Sc, Md अभ्युपेयते Mt, Mg प्यपेचते corr. to प्युपेचते Cu व्यपेच्यते cett.

[8] रामः om. Md only.

[9] °स्वारित्रस्थानां W °श्चिरत्रस्थानं Sc °श्चारित्रस्थानं corr. to °श्चारित्रस्य Cu °श्चारित्रस्य K °श्चरित्रस्य E °श्चारित्रस्थानं cett.

[10] नैतादृशः E, K न तावदृशः corr. to नैतावदृशः Cu न तादृक् W न तादृशः cett.

[11] माध्यस्थ° I_1, K, W, Sc माध्यस्थ्य° Bo, Md माध्यस्थ° corr. to माध्यस्थ्य° Cu मध्यस्थ° E, I_2.

[12] °लम्ब्यते Cu, Sc only.

[13] °वीर्ये for °वीरे Bo only.

[14] इतुः for इतरे Mt only.

[15] दमून्यचराणि . . . सर्रीन्वाथो मुक्तवा (l. 5, next page) by rev. along margin, Cu.

[16] नाम add. I_1, Bo, W, Sc, I_2 only.

[17] भद्र K, Md, Mt, Mg भद्रं Bo, W, Sc, I_2 भद्रं corr. to भद्र I_1 भद्र om. Cu, E.

[18] तच्च add. W, Sc only.

[19] चिरं om. all but Cu, E, K.

[20] नन्दतु Cu, E, K, Mt नन्द cett.

[21] °भागः Cu, E, K, Mt °भाग cett.

[22] स्वेषु कालेषु E स्वेतेषु लोकेषु Mt स्वेषु लोकेषु cett.

[23] इति add. all but Cu, K.

लक्ष्म॰। आर्ये वालिरावणयोः किन्निबन्धना मैत्री ॥

[1]श्रम॰।

कैला[2]से तुलिते जिते[3] त्रिभुवने दृप्यन्तमभ्यु[4]द्यतं
दोर्युद्धाय दशास्यमिन्द्रतनयः प्रक्षि[5]प्य कक्षा[6]न्तरे।
सान्ध्यं कर्म समाप्य सप्तसु सरि[7]न्नाथेष्वथो मुक्त[8]वा[9]-
नुन्मुक्ताय नताय [10]याचितवते सख्यं च तस्मै ददौ ॥३७॥

[11]लक्ष्म॰। दुरात्मन् पौलस्त्यकुलपांसन। एष ते क्षत्रियपरितापिनो वीर्यस्योत्कर्षः ॥

रामः। एवमुत्तरोत्तरभा[12]वैश्चित्रीयते जीवलोकः ॥

लक्ष्म॰। [13]आर्ये पुरत एष[14] शुभ्रो[15] गिरिः किन्नामधेयः ॥

श्रम॰।

नायं गिरिर्यशोराशिरिव[16] वीरस्य वालिनः।
एष दुन्दुभिदैत्येन्द्रमहि[17]षस्यास्थिसञ्चयः ॥३८॥

---

1 श्रवणा I_1, Bo श्र॰ E श्रम॰ cett.

2 कैलाशे Sc, I_2 only.

3 जिते पि तं त्रिभुवने W, Sc जितेऽपि भुवने Cu सिते त्रिभुवने E जिते त्रिभुवने cett.

4 ॰मभ्यागतं Cu, K ॰मन्युद्यतं E ॰मभ्युद्यतं cett.

5 प्राक्षिप्य Md only.

6 कक्षान्तरे Cu, K, Mt, Mg कक्षालये cett.

7 नदीन्यथेष्यो Bo नदीनाथेष्वपो Md सरीन्नाथो Cu सरिन्नाथेष्वथो K नदीनाथेष्वथो cett. (+ Mt, Mg).

8 जप्त॰ for मुक्त॰ Mg only.

9 ॰वान्मुक्तायाथ for ॰वानुन्मुक्ताय W, Sc only.

10 याजित॰ corr. to याचित॰ Cu only.

11 लक्ष्म॰ om. E only.

12 ॰भावश्चित्रीयते I_1, Md, Mt, Mg ॰भावश्चित्रायते W, Sc, I_2 ॰भावैश्चित्रीयते corr. to ॰भावैश्चित्रीयते Cu ॰भावैश्चित्रीयते cett.

13 आर्य for आर्ये W only.

14 एष ते W, Sc एव Bo एत I_2 एष cett.

15 शुभ्रो K शुभ्रा corr. to शुभ्रो Cu शुभ्रं Bo शुभ्र॰ cett.

16 ॰रति॰ for ॰रिव Mt only.

17 ॰माहिष्य॰ I_1, I_2, Md ॰माहिष॰ E ॰महिष॰ cett.

[1]लक्ष्म०। उपरुद्धान्यनेन वर्त्मानि। तत्[2] परिहृत्य गच्छामः॥

रामः। नन्वेहि॥ [3]पादेन क्षिपति॥

[4]श्रम०। आ[5]श्चर्यम्। —

[6]यत्सङ्क्रन्दननन्दनः कपिवृषा निर्मथ्य दोःस्तम्भयो-
र्व्यापारेण [7]निरास्थदस्थिगिरिवद् देवद्विषो दुन्दुभेः।
[8]तत्कङ्कालमकाण्डपाण्डुरघनप्रस्पर्धि [9]रुन्धत्पुनः
पादाङ्गुष्ठवि[10]वर्तनादयमितो [11]निर्विन्ध्यमाविध्यति ॥३९॥[12]

---

[1] लक्ष्म०। . . . नन्वेहि om. (l. 2 below). The rev. supplies लक्ष्मणः only along margin, Cu उपरु० . . . नन्वेहि (l. 2 below) om. E.

[2] तं Md, Mg इदं K तत् cett.

[3] पादेन क्षिपते Cu पादेन क्षिप्यते E इति तत् पदेन क्षिपति W, Sc पादाङ्गुष्ठेन क्षिपति Mt लक्ष्म०। पादेन क्षिपते K पदेन क्षिपति cett.

[4] राम corr. to श्रम Cu.

[5] आर्य पश्य corr. to आश्चर्यं पश्य Cu आश्चर्यं२ Md आश्चर्यं cett.

[6] क्लेशेनैव तदाशव in the orig. text and यत्सङ्क्रन्दनः by rev. along margin, Cu क्लेशेनैव सवासविः Mg यत्सङ्क्रन्दननन्दनः cett.

[7] निरास्थरास्थितगिरेर् I_1, E, I_2 निरास्थदस्थिगिरिवद् Cu, Md निरास्थदास्थितगिरेर् Bo, W, Sc. (In W and Sc निरास्थ is a corr. fr. निरास्थि). निरास्थदस्थि ‒ ‒ वद् K.

[8] तत्काङ्कालमकालपाण्डुरघन० I_1, Mt यत्तत्काण्डमकाण्डपाण्डुरघन० Md यत्तत्कालमकाण्डघस्मरवन० corr. to यत्कंलमकाण्डघस्मरवन० Cu तत्काङ्कालमकाण्डपाण्डुरघन० cett.

[9] रुन्धत्पुनः W, Sc, Bo तुं रुन्धत्पुनः corr. to रुन्धत्पुनः I_2 रुन्धन्पुनः Cu, E, I_2, Mt, Mg रुन्धत्पुरः K रुन्धन्नमः corr. to रुन्धत्पुनः Md.

[10] निवर्त० Md only. निर्वन्ध्य० corr. to निर्विध्य० I_1 निर्वध्य० Bo.

[11] निर्विघ्न० K, Cu (prob. corr. fr. निर्विंध्य) निर्विध्य० E निर्विन्ध्य० Md निर्वन्ध्य० W (corr. fr. निर्वध्य) Sc.

[12] I_1 and Bo repeat this whole speech of श्रमणा but with v. l. In this repeated passage for श्रम I_1 has राम and Bo रामः. For यत्सङ्क्रन्दननन्दनः both read क्लेशेनैव तदापि सः. For निरास्थदस्थि गिरिवद् I_1 reads निरास्थदस्थि गिरीवद्, while Bo निरास्थदस्थि गिरिव and omits the following देव. For तत्काङ्कालमकाण्डपाण्डुरघन० both read यत्तत्काण्डमकाण्डघस्मरघन०. For रुन्धत् I_1 has रुन्धन्, while Bo रुन्धत्. And for निर्विन्ध्य० Bo has निर्विंध्य०, and I_1 निर्विध्म०.

लक्ष्म॰। प्रशान्तगम्भीरनील[1]विपुल[2]श्रीररण्यगिरिभूमिः प्रसज्यते[3]॥

अम॰। ऋष्य[4]मूकपम्पापर्यन्तभूमयः खल्वेताः। तथा चाग्रतो मतङ्गाश्रमपदम्। यत्र [5]शून्येऽपि सन्नि[6]हितसोमचष[7]कविशेषपात्रपरिकरास्तीर्णबर्हि[8]रिध्मवानाज्यगन्धिरद्यापि भगवान् वैश्वा[9]नरः समिध्य[10]ते॥

रामः। अचिन्त्यसमृद्धयस्तपसां विशेषाः[11]॥

अम॰। देव[12] पश्य पश्य[13]।

इह समदशकुन्ताक्रान्तवानीरमुक्त[14]-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुख[15]रभूरिस्रोतसो निर्झरिण्यः॥४०॥

अपि च।

दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि [16]स्त्यानमम्बूकृतानि।

---

[1] ॰नील॰ om. Mg only.

[2] ॰विपुल॰ om. Bo only.

[3] प्रसज्यते om. E only.

[4] ऋश्य॰ for ऋष्य॰ I_1, Mg only.

[5] चिरशून्ये॰ for शून्ये॰ Mt, Mg only.

[6] संन्नित॰ corr. to सन्तानित॰ W सन्निहित॰ cett.

[7] ॰चमसादिविविधपात्रपरिकरास्तीर्ण॰ Mt ॰चमसादिविशेषपात्रास्तीर्ण॰ Mg. As text, cett.

[8] ॰रिध्मवानाज्यगन्धि॰ corr. to ॰रिध्मधान्याज्यगन्धि॰ Cu ॰रिध्माधानाज्यगन्धि॰ E ॰रिध्मवानाभ्यष्वङ्गधि॰ I_2 ॰रिध्मवानाज्यगन्धि॰ cett.

[9] वैश्वानरः om. Cu only.

[10] ॰ध्यति Mt only.

[11] विषाः for विशेषाः E only.

[12] देव om. K only.

[13] Om. one पश्य Cu, I_2 only.

[14] ॰मुक्त॰ om. Bo only.

[15] ॰मुख॰ for ॰मुखर॰ E only.

[16] स्यान॰ for स्त्यान॰ E only.

शिशिरकटुकषायः स्त्यायते [1]सल्लकीना-
मिभदलित[2]विकीर्णग्रन्थि[3]निष्यन्दगन्धः ॥४१॥

[4]लक्ष्म०। तत् किमभित एव प्रवृद्धपौ[5]रस्त्यमा[6]रुतवि[7]हन्यमान-कदम्बानि काननानि सङ्कलितबाष्पपटलया [8]दृशा परिक्षिप्य धनुरवष्टभ्य [9]धीरधा[10]रितशरीरेणार्येण [11]सपदि स्थीयते ॥

रामः[12]। वत्स किं न [13]पश्यसि।

स्थितमुपनतजृम्भागर्भ[14]बिम्बैः कद[15]म्बैः
कृतम[16]विकलकण्ठैस्ताण्डवं नीलकण्ठैः।
[17]उपरिविघटमान[17a]प्रौढता[18]पिच्छनीलः
श्रयति शि[19]खरमद्रे[20]र्नूतनस्तोयवाहः ॥४२॥

लक्ष्म०। स्वगतम्। अपि नामायमार्यः केनचिद्रसान्तरेण वि[21]क्षिप्येत ॥

---

1 भ्रल्ल० K only.

2 ०विदीर्ण० K only.

3 ०निष्पन्द० I_1, E निःयन्द० Cu निष्पन्दि Bo, W ०निष्यन्दि I_2, Md ०निष्यन्द० K, Mt ०निस्यन्दि Sc.

4 लक्ष्म० om. Md only लक्ष्म० तत् om. Mt only.

5 ०पौरुस्य० Bo ०पौलस्त्य० Cu ०पारस्त्य० E ०पौरस्त्य० cett.

6 Has also त्त। रित in pencil along margin, probably as v. l. for द्ध of प्रवृद्ध and रुत of मारुत I_1.

7 ०धूयमान० for ०विहन्यमान० Mt only.

8 दृशा om. Bo only.

9 धीर० om. E, K, Md, Mt, Mg only.

10 ०चारित० I_2 ०चरित० Sc ०चारिणा W ०धात० E ०धारित० cett.

11 सम्प्रति for सपदि Mt only.

12 रामः Mt रामः by rev., Cu श्रम० cett.

13 पश्य corr. to पश्यसि by rev., Cu.

14 ०गर्भविल्वैः Cu ०रम्भडिम्भैः Mt ०गर्भविम्बैः cett.

15 कदम्बैः om. Bo only.

16 ०मतिकल० for ०मविकल० I_1 only.

17 अपि च for उपरि० Mt, Mg only.

17a ०मानः for ०मान० K only.

18 ०तापिञ्छ० Md, Mt, Mg ०तापिञ्छ० corr. to ०तापिच्छ० Cu ०तापिच्छ० cett.

19 शिर० I_1 शिशिर० I_2 शिखर० cett.

20 ०मद्रौ नू० for ०मद्रेर्नू० Mt only.

21 ०क्षिप्येत I_1, Cu, K ०क्षिप्येते E ०क्षिप्यते cett.

नेपथ्ये । मातामह[1] निवर्तस्व[2] निवर्तस्व ।

त्वन्नियोगा[3]दयुक्तो[3a]ऽपि वधः साधोः करिष्यते ।
पूज्यो[4]ऽसि ननु मित्रस्य यो गुरुर्गुरु[5]रेव सः ॥४३॥

लक्ष्म० । आर्ये कोऽयम् ॥

श्रम० । देव पश्य[6] पश्य ।

बिभ्राण[7]श्चारु चामीकरकमलमयं दाम दत्तं मघोना
पिङ्गेनाङ्गेन[8] सन्ध्याच्छुरित इव महानम्बुवाहस्तडित्वान्[9] ।
उत्पाताविद्धमूर्ते[10]र्दधदुपरि गिरेर्गैरिकाङ्कस्य[11] लक्ष्मी-
मन्तः सीमन्तरेखामिव वियति[12] जवादिन्द्रसूनुस्तनोति ॥४४॥

[13]लक्ष्म० । आर्ये आर्ये दिष्ट्या[14] प्राप्तः स[15] वीरगोष्ठीविनोददान[16]-प्रिय[16a]सुहृन्माघवतः[17] ॥

रामः । स्वगतम्[18] । महावीरः[19] सः ॥

---

1 पितामह२ for मातामह Mt only.

2 निवर्तस्व Cu, E, W, Sc निवर्तस्व२ cett.

3 °न्निर्वेगा° for °न्नियोगा° Sc only.

3a °दमुक्तो° K °दमुक्तो° corr. to °दनुक्तो° Cu °दयुक्तो° cett.

4 पूज्योऽसि I_1, Mt पूज्येऽपि corr. to पूज्योऽपि Cu पूज्यस्त्वं Mg पूज्योऽपि cett.

5 °र्गुरुस्स corr. to °र्गुरुरेव Cu only.

6 पश्य corr. to पश्य२ by rev., Cu.

7 विभ्राणं चा° Cu विभीषणश्चा° E विभ्राणश्चा° cett.

8 पि गगनेन for पिङ्गेनाङ्गेन E only.

9 °डित्वात् K, Sc °टित्वात् I_2 °टित्वान् Mt, Mg °डित्वान cett.

10 °मूर्ति° for °मूर्ते° I_2 only.

11 °कांवस्य K °काङ्कस्य Mg °काङ्गस्य cett.

12 जयति for वियति Mt only.

13 लक्ष्मण by rev. along margin, Cu.

14 दृष्ट्या for दिष्ट्या W only.

15 स by rev., Cu.

16 °गोष्ठीविनोददान° K, E °गोष्ठीदान° in text and विनोद by rev. along margin, Cu °गोष्ठीदान° cett.

16a प्रियः for प्रिय° W only.

17 °न्मघवतः Cu (corr. fr. °न्माघवतः) W °न्माल्यवतः Md, Mt, Mg °न्माघवतः cett.

18 स्वगतम् om. Mt only.

19 °वीररसः for °वीरः सः E only.

ततः प्रविशति वाली ॥

वाली ।

लोकालोकालवालस्खलनपरि[1]वहत्[2]सप्रमाम्भोधिपूरं
विश्लिष्यत्[3]पर्वकल्पत्रिभुवनमखिलोत्खातपातालमूलम् ।
पर्यस्तादित्यचन्द्रस्तबकमवपतद्भूरि[4]ताराप्रसूनं
ब्रह्मस्तम्बं [5]धुनीयामिह हि[6] मम [7]विधावस्ति तीव्रो विषादः ॥४५॥

एवं [8]नामायुक्तमनुरुध्यमानाः पुमांसो महत्य[9]युक्तगह्वरे [10]पात्यन्ते । यदनेन माल्यवता पौलस्त्यमैत्री[11]दिवसम[11a]नुस्मार्य तत्रभवतो रघुध्वजस्य निधने नियुक्तोऽस्मि । अहो ग्रहः । प्रातरारभ्य मामनुबध्नन् [12]किष्किन्धायां प्रस्थाप्य सम्प्रति निवृत्तः । कष्टं[13] भोः कष्टम् ।

[14]दौरात्म्यादरिभिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्मात्मन्यतिथौ [15]निजानपि जगत्पूज्ये [16]गृहानागते ।

---

1 ०लसत्० for ०वहत्० all but K, Mt, Mg only.

2 प्रमाम्भोधिपूरं by rev. along margin, Cu.

3 ०त्पूर्व० corr. to ०त्पर्व० W ०त्पद्म० E ०त्पर्व० cett.

4 ०धारा० Cu ०ताप० Sc ०तात्पत्० I_2 ०तारा० cett.

5 धुनी० K, Cu (prob. corr. fr. लुनी०) लुनी० cett.

6 तु for हि Mt only.

7 विवस्ति for विधावस्ति by rev., Cu.

8 नामायुक्त० I_1 नाम सुयुक्त० Cu नाम युक्त० E, I_2, Md नामयुक्तमुक्त० Bo नाम युक्तमनुक्त० W, Sc तावदनुयुक्त० Mt नामायुक्तमुक्त० K.

9 ०मुक्त० for ०युक्त० Cu only.

10 निपा० for पा० Mt, Mg only.

11 दि of दिवस effaced with paint and प्रतिश्रवम० along originally vacant space by rev., Cu ०प्रतिश्रवम० K ०दिवसम० cett.

11a नुस्मार्य तत्रभवतो also by rev., Cu.

12 ०न्धाया: F, W, Sc, I_2 ०न्धायां cett.

13 भोः कष्टं भो Cu कथं भोः कष्टं E भोः कष्टं K कष्टं भोः कष्टं cett.

14 Originally a short vacant space for दौरात्म्य . . . विभि ; shows the omission supplied by rev., Cu.

15 निरागसि Mt, Mg निजानपि cett.

16 महाना० for गृहाना० Md only.

एतस्मिन्नुचितं न नाम विहितं वाचापि[1] नोक्तं[1a] प्रियं
धिक् पापेन मया रिपाविव कथं बद्धो [2]वधायोद्यमः ॥४६॥[3]

कथितं च सम्प्र[4]त्येव मे चारकैः । विभीषणेन सुग्रीवस्यापना-ख्याय रामान्तिकं श्रमणा[5] प्रेषिता । प्रतिपन्नलङ्काधिपत्यश्च तस्य[6] दाशरथिरस्मिन् मतङ्गाश्रमोपकण्ठे वर्तत इति । भवत्ववतरामि । तथा नाटयति । कः कोऽत्र भोः ।

विजितपरशुरामं सत्यधर्माभिरामं
गुणनिधिमभिरामं द्रष्टुमभ्यागतोऽस्मि ।
भवति च फल[7]वत्ता चक्षुषस्तत्र दृष्टे
भवति च रमणीयो दर्पकण्डूनि[8]काषः ॥४७॥

रामः । वत्स सौमित्रे । मामिहस्थमावेदय महाभागाय ॥

लक्ष्म° । उपसृत्य । अयमार्यस्तिष्ठति । तदुपसर्पतु महाभागः ॥ उपसर्पतः ॥

वाली । अपि त्वं [9]पुनरसौ लक्ष्मणः ॥

लक्ष्म° । अथ किम् ॥

[10]वाली । स्वगतम् ।

स एष रामश्चरिताभिरामो
धर्मैकवीरः[11] पुरुष[12]प्रकाण्डः ।

---

[1] पि नोक्तं . . . द्यमः has been supplied by rev., Cu.

[1a] नावेदितं for नोक्तं प्रियं Mt, Mg only.

[2] रिपुर्योऽधमः for वधायोद्यमः Md, Mt, Mg only.

[3] End here—Cu, Mt, Mg. For K see Appendix A.

[4] °त्येव मे W, Sc, Md °त्येव E °त्येवमेव I_1, Bo, I_2.

[5] श्रमणा Bo, W, Sc, E श्रवणा I_1, [I_2, Md.

[6] तस्य om. Bo only.

[7] फण° Sc फण° corr. to फल° W फल° cett.

[8] °कषायः for निकाषः E only.

[9] असौ only for पुनरसौ E only.

[10] वाली om. I_1 only.

[11] °वीर for °वीरः E only.

[12] पुरुषः for पुरुष° Bo only.

स्वान्येव पूर्वाणि परैश्चरित्रै-
र्यो ऽत्यद्भुतैरप्रतिमो ऽतिशेते ॥४८॥

प्रकाशम्। राम

आनन्दाय च विस्मयाय च मया दृष्टो ऽसि दुःखाय वा[1]
वैतृष्ण्यं[2] तु ममापि सम्प्रति कुतस्त्वद्दर्शने चक्षुषः।
त्वत्साङ्गत्यसुखस्य [3]नास्मि विषयस्तत्किं वृथा व्याहृतै-
रस्मिन्विश्रुतजामदग्न्यदमने[3a] पाणौ धनुर्जृम्भताम्[4] ॥४९॥

रामः।

दिष्ट्या यदद्य दृष्टस्त्वं सत्यमेतच्च युज्यते।
किन्त्वशस्त्रेषु युष्मासु कथं रामो ऽस्तु सायुधः ॥५०॥

वाली। विहस्य। भो महाक्षत्रिय। किमित्यननु[5]कम्पनीयानप्येवम[6]स्माननुकम्पसे।

ज्ञाता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते
संयत्तो[7] भव[8] सत्यमस्ति भवतः सत्यं मनुष्यो भवान्।
[9]शस्त्रैरव्यवधीयमानविजयाः प्रायो वयं तेषु चेद्
ग्राहस्ते सुखमास्व[10] सन्ति गिरयो यैर्वानराः शस्त्रिणः
॥५१॥

तदितः स्थलीमधितिष्ठावः॥

---

[1] वा om. E only.

[2] वैतृप्त्यं E वैतान्यं Bo वैतृष्ण्यं I_1, W, Sc, I_2, Md.

[3] नास्ति W, Sc only.

[3a] °हङ्घने Bo °विजये Md °दमने I_1, E, W, Sc, I_2.

[4] °र्जृम्भते Md only.

[5] °त्यनु° for °त्यननु Bo only.

[6] °यानस्माननु° E °यानस्मानप्येवमनु° Md °यानप्येवमस्माननु° cett.

[7] सम्मत्तो Bo सम्पन्नो E संयत्तो cett.

[8] भव सत्यमस्ति om. I_2 only.

[9] शस्त्रैः स्वैः रूपधीय° E only.

[10] °मास्वसन्ति W only.

लक्ष्म॰। [1]आर्य यथाह महाभागः। स्व[2]जातिसमयव्यवस्थिता युद्ध[3]धर्मा इति॥

वालिरामौ। अन्योन्यमुद्दिश्य।

कामं त्वया सह श्लाघ्यो वीरगोष्ठीमहोत्सवः।
कि[4]न्त्विदानीमतिक्रान्ते त्वय्यवीरा वसुन्धरा॥५२॥

परिक्रम्य निष्क्रान्तौ॥

लक्ष्म॰। कथमास्फा[5]लिते धनुषि कुपितः साक्रन्दनिः। तथा हि।

गर्जत्पर्जन्यघोरस्तनितमविरतारम्भगम्भीरमन्त[6]-
गुञ्जन् गुञ्जाभजृम्भाविवृतमुखविशङ्किश्वदिक्चक्रवालः।
संरम्भोत्तम्भतुङ्गस्थितविततडित्पिङ्गलाङ्गूलकेतु-
र्व्यस्तं विस्तार्य दर्पादपिहितगगनोत्सङ्गमङ्गं धुनोति॥५३॥

नेपथ्ये। वि[7]भीषण विभीषण।

आर्यस्य वालिन इव ध्वनिरेष नूनं
तस्यैव नूतनघनस्तनितप्रचण्डः।
मौर्वीरवश्च कुत एष भयानकः स्यात्
व्यापारितं किमु हरेण धनुः पिनाकम्॥५४॥

लक्ष्म॰। आर्य अयं नु[8] कः॥

---

1 आह for आर्य Bo only.

2 स्वजाति॰ repeated Bo only.

3 ॰समा for ॰धर्मा E only.

4 ॰न्त्वनित्यम॰ for ॰न्त्विदानीम॰ E only.

5 ॰लितः। धनुषि ममार्ये कुपितः Bo only.

6 ॰मन्तङ्गुञ्जा॰ Sc ॰मन्तगुञ्जा॰ Bo ॰मन्तर्गुञ्जा I_1, E, W, I_2, Md.

7 विभीषणः Md विभीष॰ E विभीषण२ I_1, Bo, W, Sc, I_2.

8 तु I_1, Bo नु cett.

श्रम०। स एष खलु विभीषणसखः सुग्रीवः सविमर्षसंरम्भं[1] सम्प्रहारमनुसरति। सर्वे च यूथपतयो गिरिगह्वरेभ्यः सम्पतन्ति॥

लक्ष्म०। तेन हि सम्प्रति मया[2]प्यारोपि[3]तव्यं धनुः॥

श्रम०। एष वालिकाय[4]दुन्दुभिकरङ्कसप्ततालगिरि[5]महीतलान्यवदार्य रामतूणीरम[6]धिशयितः शरः॥

नेपथ्ये।

मद्रोहाच्छ[7]पथात् प्रसीदतु मतिः पौलस्त्यसुग्रीवयो-
र्हे वीराः कपयः शमोऽस्तु भवतामीशः स एवास्मि चेत्।
रामात् प्राप्तमहार्घवीरमरणस्याशास्तिरेषाद्य मे
योऽहं सूर्यसुतः स एष भवतां योऽयं स वत्सोऽङ्गदः
॥५५॥

लक्ष्म०। [8]तदयमनुचराज्ञानियन्त्रणो[9]न्मुक्तवीरसमयसङ्कलदस[10]ह्यदुःखनिभृतैर्यूथपतिभिरार्येण च सपक्ष्म[11]पातवाष्पेण वी[12]क्ष्यमाणः [13]स्वद्रोहशपथयन्त्रितस[14]शोकविभीषणेन याच्यमानशरीरसौष्ठवः प्रयत्ननिरुद्धनि[15]ष्ठुरप्रहारमर्मच्छेदवेदनावेगः परिष्वङ्गव्याजवि[16]धूतसुग्रीव-

---

[1] सविमर्षसंरम्भं सम्प्रहारमनु° I_1, W, Sc, I_2 सविसर्पसंरम्भं प्रहारमनु° Bo सविमर्शं ससंरम्भं सप्राहारं समनु° E सविषसंरम्भं प्रहारमनु° Md.

[2] मभा° for मया° E only.

[3] °रोपयितव्यं Md °रोपितं corr. to °रोपितव्यं W °रोपितव्यं cett.

[4] वालीवधाय for वालिकाय° E only.

[5] °गिरिगह्वरेभ्यः पतन्मही° for °गिरिमही° Md only.

[6] °मपि for °मधि° Md only.

[7] °हाद्पथा° for °हाच्छपथा° Sc only.

[8] यदय° for तदय° W only, wanting E.

[9] °णान्मुक्त° for °णोन्मुक्त° Sc only, wanting E.

[10] °सत्य° for °सह्य° Md only.

[11] °पात° W °पातं cett.

[12] वीच° for वीक्ष्य° E only.

[13] स्वद्रोहणपथ° E, I_2 सद्रोरशपथ° Bo स्वद्रोहशपथ° cett.

[14] °शोक° for °सशोक° Md only.

[15] °निष्ठुर° om. Bo only.

[16] °धृत° for °विधृत° Md only.

कण्ठपरिधीकृतस्व[1]कण्ठकनककम[2]लमालागुणः शक्रसूनुरस्यामपि दशायां वीरश्रिया प्रदीप्यते[3] ॥

ततः प्रविशतः सुग्रीवविभीषणौ वाली रामश्च ॥

रामः । अप्राकृता[4]भिजनवीर्ययशश्चरित्रान्
पुण्यश्रियः कुलमहीधरभूरिसारान् ।
एवंविधानपि निपात्य कटुविपाकः[5]
सर्वंकषः कषति हा विषमः कृतान्तः ॥ ५६ ॥

वाली । वत्स विभीषण । पश्य पश्य । सुष्ठु शोभते वत्ससुग्रीवस्य वक्षसि सहस्र[6]पुष्करमालागुणः ॥

सुग्रीवविभीषणौ । अपवार्य ।
अकाण्डशुष्काशनिपातरौद्रः
[7]क एष धातुर्विषमो विवर्तः ।
अस्माभिरार्यैः[8] शपथैर्निरुद्धैः[9]
कथं विलङ्घ्यः[10] कथमासितव्यम् ॥ ५७ ॥

वाली । रामभद्र रामभद्र ॥

रामः । आर्य अयमस्मि ॥

वाली ।
यदासक्तं[11] दैवादनभिमतसख्येऽपि हि जने
मया[12] सख्यं प्राणैरनृण इव[13] तस्याहमधुना ।

---

[1] °स्व° om. E only.
[2] °कमल° om. Md only.
[3] दीप्यते for प्रदीप्यते Bo.
[4] °तानि जय° for °ताभिजन° Bo only.
[5] °पाकः corr. to °पाके I_1 °पाक° Bo °पाकः cett.
[6] °पुष्करस्य माला° E only.
[7] क एक I_2 कराल° E क एष cett.
[8] °रार्य E, Bo, Sc °रार्यैः cett.
[9] °रुद्धैः W, Sc °रुद्धः cett.
[10] विलब्ध्यः for विलङ्घ्यः E only.
[11] यदारब्धं W, Sc only यदासक्तं cett.
[12] यथा for मया E only.
[13] इव om. Md only.

यदन्यत् साधूनां तव च गुणराशेः समुचितं
प्रहाणे[1] प्राणानां तदपि हि[2] यथाशक्ति विदधे ॥५८॥

रामः सविनयलज्जाशोकस्तिष्ठति ॥

सुग्रीवविभीषणौ जनान्तिकम्[3]। आर्ये[4] श्रमणे। कथममृतह्रदादिवास्माकं रामदेवादेष[5] विपाकः ॥

श्रम॰। माल्यवता किलैवम्[6] ॥ इति उभयोः कर्णे कथयति ॥

वाली। वत्स [7]सुग्रीव ॥ सुग्रीवो बाष्पस्तम्भं[8] नाटयति ॥

वाली। ननु सुग्रीव[9]। [10]आः प्रतिकूलिकः[11] संवृत्तः ॥

सुग्री॰। सकरुणम्। आर्य आर्य प्रसीदाज्ञापय ॥

वाली। वत्स कथय कस्तवास्मि ॥

सुग्री॰। गुरुः स्वामी च ॥

वाली। त्वं तु[12] मम कः ॥

सुग्री॰। शिशुः प्रेष्यश्च ॥

वाली। वत्स कथय क[13] आवयोरन्योन्यधर्मः ॥

सुग्री॰। वशित्वं वो वश्यता च मम ॥

वाली। तं[14] हस्ते गृहीत्वा। तर्हि दत्तोऽसि रामाय। राम[15] नन्वेष गृह्यताम् ॥

---

[1] प्रहारे for प्रहाणे Bo only.

[2] हि om. Bo only.

[3] जानाति कं Sc only.

[4] आर्ये . . . कथं om. Md आर्ये . . . स्माकं om. Bo.

[5] ॰देवंवि॰ E ॰देषदेववि॰ W, Sc ॰देष वि॰ cett.

[6] किलैवमेवम् E only.

[7] सुग्रीव om. Bo only.

[8] ॰स्तम्भनं W only.

[9] सुग्रीव२ W, Sc सुग्रीव I_1, Bo, E, I_2, Md.

[10] स्वगतम् add. W, Sc only.

[11] प्रातिकूलिकः Bo, W, Sc, I_1 (prob. corr. fr. प्रतिकूलिकः) प्रतिकूलिकः I_2 प्रतिकुलिकंः E प्रतिकूलकः Md.

[12] तु I_1, Bo, W, Sc, Md नु E, I_2.

[13] क om. Bo only.

[14] तं om. Bo only.

[15] रामभद्र W, Sc राम I_1, Bo, I_2, Md रामाय E.

रामसुग्रीवौ। को हि पूज्यस्य गुरोर्वचनं न[1] बहु मन्यते ॥

विभी॰। अहो विस्तरस्थानेऽपि धर्मोपपत्तिपरिशुद्धः सङ्क्षेपः ॥

वाली। वत्स सुग्रीव। अथ ब्रह्मपुत्रादाचार्याज्जाम्बवतः अधीतधर्मपारायणवचनेन कीदृशस्त्वया मैत्रीधर्म आगमितः ॥

सुग्री॰।

प्राणैरपि[2] हिते वृत्तिरद्रोहो व्याजवर्जनम्।
आत्मनीव प्रियाधानमेतन्मैत्रीमहाव्रतम्[3] ॥५९॥

वाली। रामभद्र तवापि भगवतः सहस्रकिरणान्वयपुरोहिताद्वसिष्ठादेष एव[4] सम्प्रदायः[5] ॥

रामः। आर्य अथ किम् ॥

वाली। तदनेन मैत्रीधर्मेण भवद्भ्यामन्योन्यस्य वर्तितव्यम्। मदनुरोधात् क्रियतामुपनिबन्धः। अग्निसाक्षिकाच्च[6] समयो नातिवर्तते। सन्निहित एवायं मतङ्गयज्ञाग्निः ॥

रामसुग्रीवौ। अन्योन्यहस्तग्रहम्।

पुण्ये मतङ्गयज्ञाग्नौ सख्यं [7]निर्वृत्तमावयोः।
ममेव[8] हृदयं तेऽस्तु तवेव[9] हृदयं च मे ॥६०॥

वाली। रामभद्र अयं तु वत्सो विभीषणस्त्वया प्रतिश्रुतलङ्काधिराज्य[10] एव पुरतः श्रमणायाः ॥

विभी॰। सलज्जाशङ्कम्। कथं [11]ज्ञातोऽस्मि ॥

---

[1] न *after* गुरोर्वचनं I_1, Bo, W, Sc, I_2, Md; *before*, E.

[2] ॰रविहते for ॰रपि हिते E only.

[3] ॰बलं for ॰व्रतं E only.

[4] हि add. W only.

[5] ॰दायकः for ॰दायः E only.

[6] ॰काच्च I_1, Bo, E, I_2 ॰कस्य W, Sc, Md.

[7] निर्वृत्त॰ I_1, W, I_2 निर्वृत॰ Sc, Md निवृत्त॰ E निवर्त॰ Bo.

[8] ममैव E only.

[9] तवैव E only.

[10] ॰राष्ट्र for ॰राज्य Md रा only Bo.

[11] जातो for ज्ञातो E only.

श्रमणालक्ष्मणौ । अहो चारचक्षुष्मत्ता ॥

रामः । अथ किम् ॥

विभी॰ । तर्हि प्रसन्नं देवेन ॥ इति[1] प्रणमति ॥

सुग्री॰ । मयाप्यविदितः श्रमणावृत्तान्तः फलितस्त्विति तर्कितार्थोऽस्मि ॥

रामः । हे प्रियसुहृदौ महाराजसुग्रीवविभीषणौ । एष वामिदानीं सौमित्रिः ॥

लक्ष्म॰ । [2]आर्यौ लक्ष्मणोऽभिवादयते ॥

उभौ । एह्येहि वत्स ॥ इत्यालिङ्गतः ॥

श्रम॰ । अतिगम्भीरः[3] [4]सुरसः स्वीकारः ॥

वाली । वत्स विभीषण । तवाप्यलमिदानीं स्वा[5]र्थशालीनतया । एवंपरिणाममेवैत[6]द्वस्तु । रावणो हि[7] नास्त्येवेति मद्वृत्तान्तेनैव व्याख्यातम् । अपत्यस्नेहसाम्येऽपि[8] पिण्डोपजीविनो विशेषतो [9]रावणहितोपस्थानं धर्मः । स्वयं [10]कथयितुं सम्यग्विभीषणस्य प्रेयसा[11] योग इति मातामहस्य युक्तम्[12] । महान्त एव हि[13] [14]तादृशामगाधसत्त्वानामविनयपरि[15]स्पन्दितं जानन्ति । प्रचलन्ति हि मे प्राणाः । तदवसानप्र[16]पातलमुपनयन्तु मां भवन्तः ॥

---

1 इति प्रणमति om. Md only.

2 आर्यौ I_2, Bo आर्य E आर्यौ I_1, W, Sc, Md.

3 ॰गम्भीर for ॰गम्भीरः E only.

4 स्वरसः E, Bo, W, Sc, I_2, Md स्वरसः corr. to सुरसः I_1.

5 स्वाप॰ for स्वार्थ॰ E only.

6 ॰तस्तु E ॰तदस्तु Md ॰तद्वस्तु cett.

7 हि om. E only.

8 पि om. E only.

9 रावणो for रावण॰ Bo only.

10 कथयितं Md only.

11 प्रेयसा I_1, Bo, I_2, Md प्रयसा E प्रेयसो W, Sc.

12 युक्तम् om. E only.

13 हि om. E only.

14 तादृशाः समगाध॰ E तादृशा समगेध॰ Bo तादृशामगाध॰ cett.

15 ॰स्यन्दितं for ॰स्पन्दितं Md only.

16 प्रपातल॰ I_1, Bo, E, I_2 प्रपातस्थल॰ Sc, Md प्रयातस्थल॰ corr. to प्रयानस्थल॰ W.

[1]नीलप्रभृतयः ।

हा वीर हा मघवनन्दन मन्दराद्रि-
निष्कम्पसार जगदप्रतिमल्लवीर ।
उद्दर्पदुन्दुभिनिशु[2]म्भपटुप्रचण्ड-
दोर्दण्डमण्डल गतोऽसि हहा हता[3]ः स्मः ॥ ६१ ॥

इति रुदद्भिस्तैर्धार्यमाणः परिक्रम्य ।

[4]वाली । भो महात्मानः प्लवङ्गमपुङ्गवाः ।

सुग्रीवाङ्गदयोः प्रभुत्वमिह यत् सौजन्यमेतद्धि वो
मत्प्रीत्यैव तु नावधीर्यमनयोर्यद्वो महिम्नः क्षमम् ।
प्राप्तः[5] सम्प्रति रामरावणरणः स्नेहस्य निर्व्यञ्जक-
स्तस्मिन्नञ्जलिरे[6]ष शान्तमथवा वीर्येषु वः के वयम् ॥ ६२ ॥

किञ्च ।

कर्णावर्जितदिङ्मतङ्गजयुगद्व[7]न्द्वोपमर्दाश्च ते
पुच्छा[8]च्छोटदलत्समुद्रविवरैः पातालझ[9]म्पाश्च ताः ।
कापेयस्य च पौरुषस्य च तथा प्रेम्णो गरिम्णश्च यद्
दोष्णामुन्मथितद्विषां [10]सुसदृशं तन्मा[11] स्म वो विस्[12]मरत्
॥ ६३ ॥ इति निष्क्रान्ताः सर्वे ॥

॥ पञ्चमोऽङ्कः[13] ॥

---

[1] नीलप्रभृतयः om. Bo only.

[2] °निसुम्भ° I_1, Bo, I_2 °निश्शुम्भ° cett.

[3] हताःस्म I_1, Sc हताःस्मः Bo, Md, I_2 हता स्मः E हता स्म W.

[4] वाली om. E only.

[5] प्रातः for प्राप्तः Bo only.

[6] °रेव for °रेष Bo only.

[7] °द्वन्द्वाप° I_2 only.

[8] °च्छोट° I_1, E, I_2, Md °च्छाट° Bo °स्फोट° W, Sc.

[9] °झम्पा° I_1, E, I_2, Md °झञ्झा° W °रम्पा° Bo °ऊम्पा° Sc.

[10] सुसदृशं I_1, Bo, Md स्वसदृशं E, W, Sc, I_2.

[11] °न्मा स्म I_1, E, Bo, Md °न्माद्य° W, Sc °न्मा (om. स्म) I_2.

[12] विस्मरत् changed by rev. to व्यस्मरत् W.

[13] Here end I_1, Bo, Md. For end colophons see Introduction.

[1]ततः[1a] प्रविशति विषस्सो[2] माल्यवान् ॥

माल्यवान्[3]। सचिन्तम्। अहह[4] रक्षःपतेर्दुर्विनयविटपिकोरकाः परितः प्रकीर्णा इव।

वीजं यस्य विदेहराजतनयाया[5]ञ्चाङ्कुरोऽपि[6] स्वसु-
र्याञ्चा[7] तौ परिवञ्चितुं किसलयं मारीचमायाविधिः।
शाखाजालमयोनिजापहरणं तस्य[8] स्फुटं कोरकाः
[9]कीशाधीशवधोऽनुजस्य गमनं सख्यं तयोस्तेन च ॥१॥

अयमचिरादेव फलोन्मुखोऽपि भवितेति मन्ये। यतो वृद्धबुद्धिरनागतं पश्यति। निःश्वस्य[10]। अहो वामता भागधेयानाम्।

व्यसनेऽस्मिन् मन्त्रशक्त्या यद्यत्प्रतिकृतं मया।
अलसस्य यथा कार्यं तत्तत्प्रच्युतमात्मना ॥२॥

---

[1] Begins ॥ श्रीशं वन्दे ॥ E.

[1a] Folio 5 beginning with (?) and ending with कपिपुङ्ग (next page, l, 7) missing—B.

[2] निषस्सो add. W, Sc, I_2 only.

[3] माल्यवान् om. E only.

[4] अहह । रक्षः om. E only.

[5] °तनयायाज्वा° corr. by the orig. scribe to °तनयायाञ्चा. °याञ्चा° marked with (‖) above by the rev. who adds च्यां along the bottom margin, W °तनयायाञ्चा° Sc °तनयायाञ्च्या° I_2 °तनयाज्वा° E °तनया यत्रा° K.

[6] पि om. E only.

[7] यात्रा तौ परिवञ्चितुं E, Sc, I_2 यात्रा तौ परिचुम्बितुं W नासाकर्णविकर्तनं K.

[8] तत्र स्फुरत्कोरकाः E only.

[9] कीशा° E, K कोशा° W, Sc, I_2.

[10] निःश्वस्य Sc, I_2, K निःस्वस्य W विश्वस्य E.

[1]सानुतापम्। साचिव्यं नाम महते सन्तापाय।

यत्किञ्चिद्दुर्मदाः [2]स्वैरमाद्रियन्ते[3] निरर्गलम्।
तत्र तत्र प्रतीकारश्[4]चिन्त्यो वक्रे विधावपि ॥३॥

अहो दुरात्मनः क्षत्रियवटोः सर्वातिशायि[5] चरितम्। यत् तथाविधशौर्योष्माणं[6] कपिचक्रवर्तिनं [7]शनैः संयमयता[8] किं नाम न विहितम्। स्मरणं नाटयित्वा। उक्तं च किष्किन्धातः प्रतिनिवृत्तेन चारकेण यत् सीतामन्वेष्टुमनुदिशमभिदुद्रुवुः[9] कपिपुङ्गवा[10] इति ॥

नेपथ्ये।

[11]भ्रान्तीः सप्ताधिकानां प्रविदधदरुणैरर्चिषां चक्रवालैः
[12]प्राचीराणामलक्ष्यप्रसृतिरतिसमुत्तप्तरौक्मालयेषु।
अर्धप्लुष्टापसर्पद्[13]रजनिचरभटोद्गाढकल्पान्त[14]शङ्कां
लङ्कां[15] प्रौढो हुताशः सह परिदलता[16] च त्रिकूटेन लीढे ॥४॥

---

1 सानुतापम् om. E only.
2 स्वर° for स्वैर° E only.
3 °यन्तो E only.
4 प्रकार° for प्रतीकार° E only.
5 °तिशयचरितं E only.
6 °विधि° for °विध° I_2 only.
7 शनैः K शरैः E, W, Sc, I_2.
8 संयमता E only.
9 °मनुमार्गयन्तोऽनु° for °मन्वेष्टुमनु° K only.
10 Folio 6 begins with वा इति B.
11 भ्राः सप्ताधिकश्च प्रवि° in the text and चिं: प्रतीकं प्र added for °धिकश्रप° along the top margin, B भ्रान्ताः समाधिकानां प्रवि° E भ्रान्तीः सप्ताधिकानां प्रवि° K, W, Sc, I_2.
12 प्राचीरा° B, K, E, I_2 प्राग्वीरा° W, Sc.
13 °द्रजनिचर° B, K, W, Sc, I_2 °द्रजनीचर° E.
14 °शङ्कां B, K, E °शङ्कं W, Sc, I_2.
15 लङ्कां प्रौढो E, K लङ्कां प्रोढो B लङ्का प्रौढो Sc, I_2 लाङ्काप्रौढो W.
16 परिदलता त्रिकूटेन लीढे B परिलसता त्रिकूटेन लेढि K परिदलतोच्चैस्त्रिकूटेन लोटे E परिदलितोऽब्धेस्त्रिकूटो न लोठे W परिदलितोज्वेस्त्रिकूटेन लीटे I_2 परिदलितोऽब्धेस्त्रिकूटेन लोढे Sc ल्यब्लोपे पञ्चमी अब्धिमारभ्येत्यर्थः added along margin, Sc.

प्रविश्यापटीक्षेपेण[1] सम्भ्रान्ता त्रिजटा । परित्ताअदु[2] परित्ताअदु कणिट्ठ-[3]मादामहो ॥ इति सोरस्ताडनं पतति ॥

माल्य° । वत्से अलं [4]कातरतया । किमिदमुच्चैरत्याहितम् ॥

त्रिज° । उत्थाय[5] । कणिट्ठमादामह । किं कहेमि[6] मन्दभाइणी[7] । एसो खु[8] को वि दुट्ठवाणरो[9] सअलं[10] विढज्जिअ[11] णअरं खणमेत्तएण[12] तिक्खणहरणिक्खेवविक्खित्तविविहरक्खसलोओ[13] अक्खेण[14] क्खु[15] कुमालएण अणुवन्धिज्जमाणो[16] तस्सिं[17] कदन्तलीलं[18] कदुअ झत्ति णिक्कन्तो[19] ॥[20]

---

[1] प्रविश्य पटीक्षे° corr. to प्रविश्यापटीक्षे° B प्रविश्यापटीक्षे° K प्रविश्य पटाक्षे° E, Sc, I_2 प्रविश्य पटक्षे° corr. to प्रविश्य पटाक्षे° W.

[2] परित्ताअदु B, E परित्ताअदु२ K, I_2 परित्तोअदु२ Sc परित्ताअदु२ changed by rev. to परित्तोअदु२ W.

[3] कणिट्ठमादामहो K, Sc काणिट्ठमादामहो I_2 कनिट्ठमादामहो W कणिट्ठमादामह E मातामहो only K. The *chāyā* परित्रातुं कनिष्ठमातामहः along margins, W, Sc.

[4] कातरतया B, K, Sc, I_2 कातरया W करितया E.

[5] उत्थाय om. B only.

[6] कहीमि B only. [cett.

[7] °भारणी B °भाणी I_2 °भाइणी

[8] क्खु E खु cett.

[9] °वाणेरा I_2 °वाणसो W °वाणरो cett.

[10] सअलां B सयलं E सअलं cett.

[11] विटज्जिअ E, I_2 विढज्जिअ Sc विगज्जेअ B विठज्जिअ K विडस्सिअ W.

[12] °मत्तेमणे corr. to °मत्तेण B °मेत्तएण cett.

[13] तिरखणहणिखेवविखित्त° K °त्ति-खणहरिणिखेवविखित° E तिरकाणह-रणिरकेवविखि (corr. fr. °विरिक) त्त° B तीरकक्खणहरिणीखेवविखित्त° W, Sc तिरकखणहरिणीवेव विखित्ता° I_2.

[14] अरकेण I_2, K अखणे E अकखेन Sc अखेण W.

[15] खु W, K क्खु Sc वखु I_2 क्खु om. E.

[16] °वन्धिज्ज° K, W, Sc °वन्धिज° I_2 °वत्स° E.

[17] तस्सिं B, K तस्सि E, W, Sc तस्सिं I_2.

[18] कदन्तलीलं W, Sc, I_2 कटन्तलीलं E अणज्जं instead, K.

[19] णिक्कन्तो । अ । B णिकन्तो E णिवुत्तो W, Sc णिक्कन्तो I_2 णिब्बुत्तो K.

[20] The *chāyā* added: कनिष्ठमातामह किं कथयामि मन्दभागिनी° एष खलु कोऽपि दुष्टवानरः सकलमपि – – (धगध्वा instead, Sc) नगरं क्षणमात्रेण तीराकर्षणहरिणीक्षेपविक्षिप्तविविधराक्षसलोकोऽक्षेण खलु कुमारकेणानुवध्यमानस्तस्मिन् कृतान्तलीलां कृत्वा झटिति निवृत्तः W, Sc.

माल्य०। सखेदम्। किं नाम दग्धं नगरम्। हतोऽक्षः कुमारः। अपि को नामायं कपिः स्यात्। सस्मरणम्[1]। उक्तं च[2] चारकेण हनू[3]मान[4]वाचीं दिशमिति। अहह।

तूलदाहं [5]पुरं लङ्कां दहतैव हनूमता।
अपि लङ्कापतेस्तीव्रः प्रतापो निरवाप्यत ॥५॥

वत्से अपि तेन सीताप्रवृत्तिरुपलब्धा ॥

त्रिज०। कणि[6]ट्ठमादामह पुरदो जेव्व[7] को वि मक्क[8]डपरमा[9]णू तीए सह[10] मन्तअन्तो दिट्ठो। तीए वि उ[11]म्मोचिअ केसाहरणं अहिण्णाणं ति[12] से[13] हत्थे समप्पिदं। एत्तिअं जाणामि ॥

माल्य०। किं न पर्याप्तम्। साशङ्कम्। एकेनैव कपिपरमाणुना तावदेवमनुष्ठितम्। एवं परःशताः कोट्यः श्रूयन्ते सम्प्रति सुग्रीवभुजबलपरिपालिते कपिसर्गे ॥

त्रिज०। सवि[14]तर्कम्। कहं तारिसी सुउमारदंसणा वि [15]सुसिणिद्ध-व्वाहारा वि[16] माणुसी वि सीदा अम्हाणं रक्खसाणं पि[17] रक्खसी जादा ॥

---

[1] स्मरणं नाटयित्वा for सस्मरणम् E only.

[2] च चारकेण K, W, Sc, I_2 चारकेण only E चापसर्पेण B.

[3] हनु० for हनू० E only.

[4] प्राचीं दिशमेति for अवाचीं दिशमिति E only.

[5] पुरीं for पुरं E only.

[6] कनिट्ठ० K only.

[7] ज्जेव Sc जेव्व cett.

[8] मक्कड० K, E, Sc, I_1 मक्कट० B मक्कण्ड० W.

[9] ०माणु for ०माणू E only.

[10] सह B, E, K समं W, Sc स I_2.

[11] दुःमोचिअ for उम्मोचिअ E only.

[12] ति om. E only.

[13] से B, K तस्स E, W, Sc स I_2.

[14] सविमर्षं B सवितर्कं cett.

[15] सुसिणिद्धवाहारा K, W, Sc, I_2. Orig. सुसिणिद्धवाहारा; but ि of सि has been marked by rev. as intended to be omitted, B सुसिणध्धव्वाहारा E.

[16] व्वि E वि cett.

[17] All MSS. read वि.

माल्य॰। वत्से युज्यतेऽपि।[1]

पतिव्रतामयं ज्योतिः शान्तं दीप्तं[2] च घुष्यते ।

विमृश्य। अथवा[3] किं नाम सा वराकी।

दुष्कर्मणां परी[4]पाकः स्वे[5]षामेवैष दीप्यते ॥६॥

त्रिज॰। कणि[6]ट्ठमादामह पढमं[7] खु दण्डकार[8]ण्णपेर[9]न्तपरिट्ठि[10]दवि-[11]विहमहीहरप्पदेसेसु णिवासो जेव्व[12] अम्हाणं रक्खसाणं विहा[13]रो क्खु णिखिलम्मि जम्बू[14]दीवे। सम्पदं खु[15] इह णअरे वि अक्ख[16]मो णिवासो। का [17]गदी। को पडिआ[18]रो ॥

माल्य॰। वत्से किमेवमतिकातरासि। पश्य।

दुर्गोऽयं[19] च त्रिकूटस्तदुपरि नगरं सप्त[20]धातुप्रकार-
प्राकारं दुस्त[21]रैषा निरवधिपरिखा[22]ब्धिरभङ्[23]गोर्मिः ।

---

[1] यतः add. B only.

[2] दीपं च पुष्यसि for दीप्तं च घुष्यते E.

[3] अथ for अथवा K only.

[4] परिपाकः E only.

[5] स्वेषामेवैष B, E, K स्वेमामेवेष I_2 स्वेयमेवैष W, Sc.

[6] कनिट्ठ॰ E only.

[7] पहमं B पढं E पठमं K पढमं W, Sc, I_2. Along margin by rev.: 'The Rakashasas once people[d] Jamb-Dwipa—if now driven from Lanka where are they to go', W.

[8] ॰कारण्ण॰ for ॰कारण्ण॰ K only.

[9] Orig. ॰पेरन्त॰, but changed to ॰परन्त॰ by rev., B ॰पेरन्त॰ cett.

[10] ॰परिच्छिद॰ B ॰परिट्ठिदं E ॰परि-ट्ठिद॰ cett.

[11] ॰विविह॰ om. E ॰विंह॰ K ॰विविह॰ cett.

[12] ज्जेव्व B ज्जेव E जेव्व K, W, Sc, I_2.

[13] विहारो B, E, K विहारा W, Sc विहोरा I_2.

[14] जम्बूदीवे B जम्बुदीवे E जम्बूदीपे K, Sc, I_2 जम्बूद्वीपे W.

[15] खु B, K, W, I_2 क्खु E, Sc.

[16] अक्खमो K, E, Sc अवखमो I_2 अखमो W.

[17] गदी E, K गई B, Sc गद W गरी I_2.

[18] पडी॰ for पडि॰ E only.

[19] दुर्गोऽयं च त्रिकूट॰ E दुर्गं सोऽयं त्रिकूट॰ B दुर्गोऽयं चित्रकूट॰ K, W, Sc, I_2.

[20] सप्तधातुर्प्रकारं E only.

[21] दुर्गमेषा for दुस्तरैषा E only.

[22] ॰ष्यच्चि॰ for ॰ष्यब्धि॰ I_2 only.

[23] ॰रभ्रङ्कर्षाभिः E only.

विमृश्य। अथवा किमनेन।

दोर्दण्डा एव दृप्यद्रिपुदलनमहासत्त्रदीक्षा[1]प्रतीक्षारक्षोनाथस्य

वामाक्षिस्पन्दनं सूचयन्[2]। सव्यथम्।

किं[3] नो विधिरिह वचनेऽप्यक्षमो दुर्विपाकः ॥ ७॥

वत्से वत्सस्य कुम्भकर्णस्य निद्रापगमसीम्नः कियदवशिष्टम् ॥

त्रिज०। कणिट्ठमादामह अस्सिं[4] जेव्व[5] कसणचउद्दहीदिअहे[6] चउत्थो मासो [7]परिसमत्तो ॥

माल्य०। कथमद्यापि विप्रकृष्टतमः किल[8] प्रबोधकालः। सस्मरणम्[9]। विमृश्यमाने तु दिष्ट्या कनिष्ठवत्स एव दूरदर्शी [10]यस्याविमृश्यकारितापि[11] शुभोदर्का। सुबहुशोऽप्यभिसन्धीयमाने कुलप्रतिष्ठातन्तुं तमेवोत्पश्यामि ॥

त्रिज०[11a]। ससम्भ्रमम्। कणिट्ठमादामह[12] हद्धी[13] हद्धी। सन्तं पावं पडिहदममङ्गलम्[14] ॥

माल्य०। किमिति ॥

---

[1] °दीक्षाप्रतीक्ष्या B, I_2 °दीक्षाप्रतीक्षा K, E °दीक्षाः प्रतीक्ष्या Sc °दीक्ष्या प्रतीक्ष्याः corr. by rev. to दीक्षा प्रतीक्षाः W.

[2] सूचयित्वा for सूचयन् E only.

[3] Lacuna for किं नो B.

[4] अस्सिं B, K अस्सिं W, Sc, I_2 आस्सि E.

[5] ज्जेव B ज्जेव्व K जेव्व E, W, Sc, I_2.

[6] °चउद्दसी° B only.

[7] परि om. E only.

[8] किल om. B only.

[9] स्मरणः for सस्मरणं E only.

[10] यस्याविमृ° B, E, K, I_2 यस्य विमृ° W, Sc.

[11] प्रायः add. B only.

[11a] त्रिज०। . . . किमिति (l. 14 below) om. K only.

[12] कनिट्ठ° E only.

[13] हद्धी२ B, W हद्धी Sc, I_2 हध्धि and र for २ E.

[14] पडिहत° E only.

विज॰। कणिट्ठमादामहस्स अञ्जं ण[1]ञवअणोवणासो अ[2]णस्सिं जेव्व[3] [4]कस्सिं [5]अमङ्गले ज्जेव्व[6] विस्स[7]न्तो ॥

माल्य॰। वत्से न[8] तदनुसन्धायोक्तम्। एवं किलावसीयते। यतः

न कुत्राप्यन्यत्र प्रबलभवितव्यादयमहो
[9]विशुद्धो नीत्यध्वा पतति न च तत्पा[10]न्यधिषणा।
यथा स्वैरं[11] भ्राम्यन्निरवधि वि[12]यत्यस्तशिखरं
व्यु[13]दस्यायं भास्वांस्तदनुगतघस्रार्चिरपि सा ॥८॥

तदत्र प्रतीकारेषु केवलं[14]मतिसन्धानजृम्भितमवशिष्यते। कृत[15]मनेन। वत्से अवैषि किमुपक्रमस्तावद्देवो[16] दशकन्धरः॥

विज॰। कणिट्ठमादामह सामी[17] खु[18] सम्पदं सव्वतो[19]भद्दं णाम अट्टा[20]लअं आरुहिअ तीए रक्खसकुलकालरत्तीए अधिट्ठिदं अ[21]सो-

---

[1] णयवअणोवणासो B णाअवअणोव-णासो K, W, Sc णंववअणोवणासो E णाअवअणोवसासो I_2.

[2] अणस्सि B अणस्सिं K अणंसिं E अण्स्सिं W, Sc, I_2.

[3] ज्जेव B जेव्व K ज्जेव्व E, W, Sc, I_2.

[4] कस्सि I_2 कस्मिं K कस्सिं cett. .

[5] वि add. B only.

[6] ज्जेव B ज्जेव्व K जेव्व W, Sc, I_2 जेव E.

[7] विसंत्तो B विसन्तो E विस्सन्तो cett.

[8] न तदनुसन्धायोक्तं K, E, I_2 तदनु-सन्धाय नोक्तं B नैतदनुसन्धायोक्तं Sc नैतदननुसन्धायोक्तं W.

[9] विशुद्धो नीत्यध्वा K, B विशुद्धो मीत्वध्वा E विशुद्धैवोत्पत्त्या W, Sc वि-शुद्धेनोत्पथ I_2.

[10] तत्पान्थ॰ B, K तत्पांथ॰ I_2 तत्पाप॰ E, W, Sc.

[11] स्वैर for स्वैरं E only.

[12] विपर्यस्त॰ E only.

[13] व्यदस्या॰ E only.

[14] केवलमति॰ B, K, I_2 केवलं मति॰ E, W, Sc.

[15] ॰मेतेन for ॰मनेन K only.

[16] ॰द्देव॰ for ॰द्देवो W only.

[17] सामि E only.

[18] खु B, E क्खु K, W, Sc, I_2.

[19] सव्वतोमद्दअं B सव्वतोभद्दं K, I_2, Sc सत्तवोभद्दं E संव्वत्तोभद्दं W.

[20] अदालअं B अन्दोलअं K अट्टालअं E अट्टालअं Sc अदालअं W अट्टानअं I_2.

[21] असोकवणिकं B असोअवण्यअं E असोअवणिअं K, W, Sc, I_2.

अवणिअं जेव्व[1] पुलोअन्तो[2] चिट्ठदि। अणं[3] च[3a]। इदोहिंमुहं[4] पउत्ताए[5] एसा पउत्ती[6] सुदा। एदं णअरवुत्तन्तं अणुहविअ[7] किं पि[7a] दुम्मणाअन्ती[8] सामिणी[9] देवं[10] पडिवोहेदुं[11] तहिं जेव्व[12] पत्थिदत्ति[13] ॥

माल्य॰। वत्से स्त्रीत्वेऽपि वरं सा खलु देवी[14] मन्दोदरी यन्मतिः प्रतिबोधनायोत्ताम्यति[15]। न पुनर्देवो यः प्रतिबोधितोऽद्यापि[16] न बुध्यते। तदेहि तावदभ्यन्तरं प्रविश्य प्रणिधिकृत्यं[17] विचारयामः ॥

इति निष्क्रान्तौ ॥

॥ विष्कम्भकः[18] ॥

ततः प्रविशति सोत्कण्ठो रावणः ॥

रावणः। सीतां विभाव्य।

मुखं[19] यदि किमिन्दुना यदि चलाञ्चले लोचने
किमुत्पलकदम्बकैर्यदि तरङ्गभङ्गी[20] [21]भ्रुवौ।

---

1 ज्जेव B जेव्व cett.

2 पुलोअन्तो B, K पुलोयंवो E पुलोअतो W पुलोअत्तो Sc, I_2.

3 असं E अणं K, Sc, I_2. Prob. अणं changed to अणं W.

3a अ all MSS.

4 इदोहिंमुहं B, E, K इहिंमुहं W, Sc, I_2.

5 पउत्ताए एसा K, E पउत्ताए मये एसा B उपता एसा W, Sc उम्मत्ताए एसां I_2.

6 पउत्ति E पउती Sc पउत्ती cett.

7 ॰हवि for ॰हविअ B only.

7a वि all MSS.

8 ॰अन्ती K, E, W, Sc ॰एती B ॰एअन्ती I_2.

9 सामणी B सामिणी K, E, Sc सामीणी W सामिणि I_2.

10 देवं om. W, Sc, I_2, B only.

11 पडिवोधिदुं B पडिवोहेदुं E पडिवोहिउं W, Sc, I_2 पडिवोहिदुं K.

12 जेव्व all.

13 ॰देत्ति K, I_2 ॰देत्ति E, W, Sc.

14 देवी om. E only.

15 प्रबोध॰ for प्रतिबोध॰ E only.

16 प्रतिवोवितोऽप्यद्यापि B प्रतिवोधितोऽपि E प्रतिबोधितोऽद्यापि K, W, Sc प्रविवोधितोऽद्यापि I_2.

17 प्रणिधी॰ E only.

18 मिश्रविश्रम्भकः B विष्कम्भकः cett.

19 मुख्यं W only.

20 ॰भङ्गि B only.

21 भ्रुवोः K only.

किमात्मभवधन्वना यदि सुसंयताः कुन्तलाः
किमम्बुवहडम्बरैर्यदि[1] तनूरियं किं श्रिया ॥९॥

सस्मरणोल्लासम्। अहो हलमुखविनिर्भिन्नविश्वम्भराविर्भूतयोषिद्रत्नमनुबध्नता[2] मम मनोरथेन चिराय फलितम्। विमृश्य। अनुकूलस्य विधेः किलायं विलासः[3]। सगर्वम्। अथवा क एष विधिरपि।

पिष्ट्वा ब्रह्माण्डमस्मादथ भुवनविभागान्[4] व्युदस्यापि किञ्चि[5]-
द्ब्रह्माणं चाधिकृत्याप्रतिमरुचिभरं[6] स्वं प्रतापं यशश्च।
[7]सूर्येन्दू संविधाय स्वयमधिकतरं निर्वृतः स्यामहं चेन्
न स्यादालस्यदोषः सकरुणमथवा कोऽनुकम्प्येषु कोपः
॥१०॥

ततः प्रविशति मन्दोदरी चेटी च[8] ॥

चेटी। इदो[9] इदो भट्टिणी[10]। एदं अट्टालअ[11]सोवाण[12]मग्गदुआर[13]अम्। ता[14] आरोहदु भट्टिणी[15] ॥

मन्दोदरी। सोपानारोहणं नाटयित्वा। रावणं निरूप्य। कहं एसो महारा[16]-

---

[1] °म्बुवह° B, E, K, I₂ °म्बुरुह° W, Sc.

[2] °मनुवध्नता B, E, K, I₂ °मनुभवतो W, Sc.

[3] विलासः B, K विश्वासः E, W, Sc, I₂.

[4] °भागान् B, E °भागान K °भागात् W, Sc, I₂.

[5] कञ्चि° for किञ्चि° K only.

[6] °भरं B °तरं cett.

[7] अर्केन्दू B सूर्येन्दू cett.

[8] च om. B only.

[9] इदो२ B, E, K इदो W, Sc, I₂.

[10] भट्टिणी B, E, Sc भट्टिणी I₂ भट्टिनी W भट्टिदाणी K.

[11] अट्टालअ° K अट्टाल° B, E अदानअ° I₂ अराजअ° Sc अवलअं W.

[12] °सौअवाण° B °सौवाण° W, I₂ सोवाण K, E, Sc.

[13] °दुवारं B °दुआअं K °दुआरअं E, Sc °दुआरंअं W °दुआरअ I₂.

[14] ता B, E, K, I₂ तं W, Sc.

[15] भट्टिणी B, E, K, Sc भद्दिणी I₂ भट्टिनी W.

[16] °राय° for °राअ° B only.

अदसक[1]न्धरो उ[2]वविट्ठो चि[3]ट्ठदि । निर्वर्ण्य । कहं असोअवणिआसम्[4]मुहं पुलो[5]एदि । सखेदम् । कहं ईरिसे[6] वि[7] रि[8]उवक[8a]खाहिओए सम्पत्ते रा[9]अकज्जणि[10]रवेक्खो लक[11]खीअदि महा[12]राअदस[13]कन्धरो । इति उपसृत्य । जेदु जेदु महा[14]राअदसक[15]न्धरो ॥

राव० । आकारसंवरणं नाटयित्वा । कथं मन्दोदरी । इति पार्श्वे समुपवेशयति ॥

मन्दो० । तथा कृत्वा । महा[16]राअ किं एत्थ चिन्तिदम् ॥

राव० । कुत्र ॥

मन्दो० । [17]रि[18]उवक्खाभिओए[19] ॥

राव० । सोत्प्रासम् । कथं रिपुस्तत्पक्षस्तदभियोगश्चेत्यश्रुतं श्राव्यते देव्या ।

[20]योऽहं द्वाभ्यां भुजाभ्यां मृधभुवि युगपन्मत्तदिग्दन्तिदन्तान्
रुध्वा दोर्भिश्चतुर्भिः सरभस[21]पतितान्दिक्पतीनप्यरौत्सम् ।

---

1 °कन्द्री E only.

2 उवट्ठिदो W उवचिट्ठो B उवविट्ठो cett.

3 चिट्ठदि B, E, K, I_2 वट्टदि W, Sc.

4 °सम्मुखं B only सम्मुहं cett.

5 पुलोवेदि for पुलोएदि E only.

6 इरिसे for ईरिसे E, Sc only.

7 वि om. E only.

8 रिवु° B रिउ° cett.

8a °वक्खाहिओए all.

9 राय° for राअ° B only.

10 °णिक्खेवो Sc °णिखेवो W णिर-वेक्खो cett.

11 लकीयदि B लक्खीयदि E लक्खीअदि cett.

12 °राय° B °राअ° E, K, Sc, I_2 °राजाअ° corr. to °राअ° W.

13 °दश° for °दस° Sc, I_2 only.

14 °राय° for °राअ° B only.

15 °दसकन्धरो B, K, W, I_2 °दसकन्द्री E °दशकन्धरो Sc.

16 °राय° for °राअ° B only.

17 एत्थ add. B only.

18 रिवु° B रिउ° K, W, Sc, I_2 दु° E.

19 °पक्खाभियोए B °वक्खाभिआए E °पक्खाभिओए W, Sc, I_2 °क्खाभिओए K.

20 द्वाभ्यां for योऽहं B only.

21 सरभसपतितान् B, E, K सरभसमपितान् W, Sc सरभसपरितितात I_2.

दीप्यद्भुजा[1]दिचण्डप्रहरणपतनक्षुण्णवक्षस्त्वचो मे
तस्यापि प्रातिभट्या[2]द्रिपुरिति कलितः कोऽप्यपूर्वः
प्रमादः[3] ॥११॥

भवतु । तथापि श्रोतव्यम् । देवि स कः ॥

मन्दो° । [4]णिखिलवलीमुहचक्काणुगदसुग्गीवग्गेसरो[5] [6]सहकणिट्ठो दासरही[7] रामो त्ति[8] सुणीअदि ॥

रावण° । किं सहानुजस्तापसः । देवि किं[9] तेन तैर्वा ॥

मन्दो° । महाराअ समुदाओ खु[10] सङ्खीअदि[11] । अवरं च[11a] । साअरवेलासु[12] सेसं[13] विणिवेसिअ[14] आहूदो णेण साअरो ण णिग्गदो भवणादो । तदा तु । संस्कृतमाश्रित्य ।

प्रायुङ्क्तास्त्रं[15] स किञ्चिज्जलनिधिकुहरे यन्महिम्ना क्षणार्धा-[16]
दावृत्यावृत्य[17] चक्रभ्रममखिलमभूत् क्वाथतः[18] शोणमम्भः ।

---

1 दीप्य° K, W, Sc, I_2 दृप्य° E स्फूर्ज° B.

2 प्रातिमल्या° for प्रातिभट्या° E only.

3 प्रवादः B प्रमादः K, E, I_2 प्रसादः W, Sc.

4 णिखिल° K, W, I_2 निखिल° B, E णिखल Sc.

5 सुग्गीवग्गेसरो B, K सुग्गिवाग्गेसरो E सुग्गीवअग्गेसरो W, Sc सुग्गिवग्गेसरो I_2.

6 सकणि° for सहकणि° E only.

7 °थी for °ही B only.

8 त्ति B, K, Sc, I_2 ति E, W.

9 किं तेनं ते तैर्वा सः B किं तेन तेन तैर्वा E किं तेन तैर्वा K किं गतेन ते तैर्वा सः Sc, I_2 किं गतेन ते तैर्वा सः corr. to किं तेन ते तैर्वा सः W.

10 खु B, E, K क्खु W, Sc, I_2.

11 °यदि for °अदि B only.

11a अ all MSS.

12 साअरं वेलासुं B साअलेखासु E साअरवेलासु K, W, Sc, I_2.

13 सेस B, K सेसं E सेसा I_2 सेव्वं W स्से Sc.

14 सप्पिवेसिअ for विणिवेसिअ E only.

15 प्रायुक्ता° B, E प्रायुङ्क्ता° K, W, Sc, I_2.

16 क्षपा° for क्षणा° Sc only.

17 °दावृत्य व्यक्तचक्रभ्रम° E °दावृत्यात्य चक्रभ्रम° cett.

18 कषतः for क्वाथतः E only.

उन्मूर्छन्नक्रचक्रं झटिति परिदलत्कच्छपौघं प्रमुह्यद्-
भूयःपाथोमनुष्यं स्फुट[1]दतुलरवं प्रस्फुरच्छङ्खशुक्ति ॥१२॥

राव०। सावज्ञम्। किं ततः ॥

मन्दो०। महाराअ[2] तदो अ पुह्णमेत्त[3]पेक्खिज्जमाणतिक्खसरणिअरपम्हलिदसरीरेण[4] साअरेण[4a] णिक्कमिअ सलिलादो सवादवडणं[5] अब्भत्थिअ मग्गो उवदिट्ठो। साहसिएण उण तेण[6] साहिज्जदि[7] त्ति सुणीअदि[8] ॥

राव०। सहासम्। अस्तु। श्रूयते। देवि कीदृशः ॥

मन्दो०। महाराअ[9] वलीमुहसहस्साणीदेहिं महीहरेहिं सेदू णिम्मीअदि[10] ॥

राव०। देवि विप्रलब्धासि केनचित्। अकलितगाम्भीर्यमहिमा किलायं पाथोनाथः[11]। पश्य[12]।

[13]जम्बूद्वीपेऽथवान्येषु द्वीपेष्वपि महीधराः।
यावन्तस्तैः कुक्षिकोणोऽप्यस्य न भ्रियते[14] किल ॥१३॥

---

[1] ०दतुलगिरिप्रस्फुरच्छङ्ख० B ०दतुलरवं प्रस्फुरच्छङ्ख० K ०दतुलरवप्रस्फुटच्छङ्ख० E, I_2 ०दतुलरवं प्रस्फुटच्छङ्ख० W, Sc.

[2] ०राय for ०राअ B only.

[3] पेखि० for पेक्खि० W only.

[4] ०सरीरे B सरीरेण cett.

[4a] साअरेण om. all but K, E.

[5] ०पडणं for ०वडणं K only.

[6] तेन for तेण I_2 only.

[7] साहिज्जदि त्ति K साहि ज्जदि वित्ति B साहिज्जविती E साहिज्जवित्ती W साहिज्जवित्ति I_2 साहिज्जविति Sc.

[8] सुणीअदि B, K, W, Sc मणीअदी E मणीअदि I_2.

[9] ०राय for ०राअ B only.

[10] णिम्मीयदि B णिम्मीअदि K, W णिम्मोअदि Sc, I_2 सीम्मीअदी E.

[11] पाथःपतिः B पाथोनाथः cett.

[12] पश्य om. all but B, K.

[13] जम्बु० for जम्बू० E only.

[14] भ्रियते W, Sc म्रियते I_2 भ्रिये K ध्रियते B क्रियते E.

अपि च । साहसिकेनेति वदन्त्या देव्या विस्मृतप्रायं[1] जगत्यन्यो[2]ऽपि साहसिकः । मत्साहसे तु

उत्पुष्य[3]ज़लधमनिस्फुटप्रसर्पत्-
प्रत्यग्रक्षतजझरीनिवृत्तपाद्यः ।
हर्षाश्रुप्रचुरमधुस्मितस्फुटश्री-[4]
वक्त्राब्जार्चितचरणः शिवः प्रमाणम् ॥१४॥

मन्दो॰ । महाराअ[5] ओधारेहि[6] किं पि[6a] असारिसी[7] रअणा[8] कस्स[9] वि[10] वलीमुहस्स हत्थप्फंसादो[11] उवरि जेव्व[12] चिट्ठन्ति[13] ते महीहरा जलम्मि त्ति[14] ॥

राव॰ । सशिरःकम्पम् । इदं तदप्रती[15]कार्यं मौग्ध्यमबलानां यद् ग्रावाणोऽपि प्लवन्त इति । देवि किं बहुनोक्तेन[16] ।

श्रुतं मे[17] जानाति [18]श्रुतिकविरथाज्ञां सहचरः
स शच्या धैर्यं चाशनिरथ यशोऽद्स्त्रिभुवनम् ।

---

[1] विस्मृतंप्रायः B, E, K विस्मृतप्रायः Sc, I_2 विस्मृतप्रायः corr. by rev. to विस्मृतप्रायं W.

[2] जगत्यन्योऽपि साहसिकः om. all but B.

[3] उत्पुष्प॰ B, I_2 उत्पुष्य॰ E, W, Sc, K.

[4] ॰श्रीवक्त्रा॰ W, B ॰श्रीर्वक्त्रा॰ K, E, Sc, I_2.

[5] ॰राय for ॰राअ B only.

[6] जं add. E only.

[6a] वि all MSS.

[7] अणारिसी B, E, K अणारिसी W, Sc अणा I_2.

[8] रआगा B रआणो E रअणा K, W, Sc रअणा om. I_2.

[9] कस्य for कस्स W only.

[10] वि om. E only.

[11] हत्थप्पसादो B हध्थप्पुंसादो E, K हत्थपुंणदो Sc हत्थपुणदो W हत्थपुसादो I_2.

[12] जेव्व E, W, B ज्जेव्व K, Sc, I_2.

[13] चिट्ठन्ति B चिट्ठण्डि E चिट्ठन्दि K, W, Sc चिद्दन्दि I_2.

[14] त्ति B, K, I_2 ति E, W, Sc.

[15] ॰प्रति॰ for ॰प्रती॰ K only.

[16] बहुना for बहुनोक्तेन K only.

[17] जानाति मे for मे जानाति E only.

[18] शिवगुरु॰ for श्रुतिकवि॰ K only.

बलं कैलासाद्रिः किमपरमहो साहसमपि
क्षरत्कीलालाम्भःस्नपितचरणः खण्डपरशुः ॥१५॥

नेपथ्ये महान् कलकलः ॥

मन्दो°। महाराअ[1] परित्ताएहि[2] परित्ताएहि। इति सत्रासमुदीच्यते ॥

राव°। देवि[3] अलं शङ्कया ॥

पुनर्नेपथ्ये। भो भो लङ्काद्वाररक्षिणो राक्षसाः[4]।

दत्त[5] द्वाराणि तूर्णं सरलतरुगुरूरश्मसारार्गलाश्च[6]
क्षेप्यं[7] तच्छस्त्रजातं तदुपरि नयत स्वान्ययोश्चावधत्त[8]।
नीरुन्ध्वं[9] निर्यियासून्[10] शिशुयुवतिजनान्[11] वीवधांश्चाद्रियध्वं[12]
प्राप्तः सुग्रीवमुख्यप्लवगपरिवृतः[13] सानुजो रामभद्रः[14]
॥१६॥

नेपथ्येऽर्धप्रविष्टा[15] प्रतीहारी[16]। भट्टा एसो पडिहारभूमीए[17] चिट्ठदि सेणावदी[18] पहत्थो विण्णविदुकामो[19] ॥

---

[1] °राय for °राअ B only.

[2] परित्ताएहि२ B, E, K, I_2 परित्ताहि२ W परिताहि२ Sc.

[3] देवि om. K only. [W, Sc.

[4] राक्षसाः B, E, K, I_2 राक्षसगणाः

[5] दत्तं for दत्त I_2 only.

[6] सरलतरुगुरूरश्मसारार्गलाश्च B, K, I_2 सरलतरगुरूरश्मसारार्गलाश्च W सरलतरगुरुरश्मसारार्गलाश्च Sc सरलतगुरूश्मरार्गलाश्च E.

[7] क्षेप्यं तच्छस्त्र° B क्षेप्यं तच्छत्र° E क्षिप्यं तच्छस्त्र° I_2 क्षिप्यन्तां छस्त्र° W क्षिप्यन्तां शस्त्र° Sc क्षिप्रं तच्छस्त्र° K.

[8] स्वान्ययोश्चा° B, E, K, I_2 स्वान्ययोंश्चा° Sc स्वान्यपोंश्चा° W.

[9] नीरुन्ध्वं B रुन्धध्वं E, W, Sc, I_2 रुन्धध्व K.

[10] निर्यियासून् B, E निर्वियासून् I_2 निर्विषासून् W, Sc स्वान्यियासून् K.

[11] जना for जनान् E only.

[12] विवधाश्च for वीवधांश्च E only.

[13] °वृतः B, E, K °हृतः W, Sc °दृतः I_2.

[14] °भद्रः K, E, W, Sc, I_2 °चन्द्रः B.

[15] °र्धप्र° B, E, K, I_2 °र्धप्र° W, Sc.

[16] २ add. E only.

[17] भूमीए B, E, K भूमिए W, Sc, I_2.

[18] सेणा र्द्धि and below it पदि B सेणावदि E सेणावई Sc, I_2 सेणावइ W सेणावदी K.

[19] विण्णविदु° orig., but prob. ि of विदु is intended to be dropped, B विण्णविदु° E, K विणविदु° W, Sc, I_2.

रावः। कथं सेनापतिः प्रहस्तः। प्रवेशय॥

प्रती॰। तहा। इति निष्क्रान्ता॥

ततः प्रविशति प्रहस्तः॥

प्रहस्तः। अहो मनुष्यपोतस्य तावदत्यूर्जस्वलं चरितम्। तथा हि।

[1]भीमं गोष्पदवद्विलङ्घ्य[2] परितः कल्लोलमालाकुलं
पाथोनाथमुपेत्य मन्थरतरं[3] लङ्कानिबद्धेक्षणः।
स्कन्धावारमसौ निवेश्य विषमे सौवेलमूर्ध्नि स्वयं
कैश्चिद्वानरपुङ्गवैः परिवृतोऽध्यास्ते पुरः प्राङ्गणम्॥१७॥

पुरो[4] निरूप्य। कथमयं लङ्केश्वरः। [5]उपसृत्य। जयति जयति लङ्केश्वरः॥

राव॰। भद्र सेनापते किंहेतुरयं कलकलः॥

प्रह॰। स्वगतम्। कथमद्याप्यनभिज्ञ एव देवः। भवतु। कार्यमात्रं विज्ञापयामि। प्रकाशम्।

पुरं निः[6]शेषघटितक[7]पाटद्वारमावृ[8]तम्।
रक्षा चाग्निभेक्तिमद्भिः कौणपैः परितः कृता॥१८॥

राव॰। किमिति॥

प्रह॰। स्वगतम्। कथं सैवावस्था। भवतु। प्रकाशम्। देव लङ्केश्वर।

मनुष्यपोतमात्रेण सानुजेन पुरी तव।
रुध्यतेऽद्य[9] यथा सा[10]रवीवधाद्यपि दुर्लभम्॥१९॥

---

[1] भीमं changed to भीष्मं W भीमं cett.

[2] ॰लम्व्य for ॰लङ्घ्य K only.

[3] मन्थरतरं W, Sc, I_2, B मन्थरतलं E शैलशिखरं K.

[4] पुरो निरूप्य W, Sc, I_2, K, B पुरोऽवलोक्य E.

[5] उपसृत्य। जयति जयति लङ्केश्वरः om. all but B.

[6] विशेष॰ for निःशेष॰ B only.

[7] ॰कपाट॰ K, W, Sc, I_2, E ॰कवाट॰ B.

[8] ॰वृत्तं for ॰वृतं Sc only.

[9] ॰तेऽद्य K ॰ते स्म cett.

[10] सार॰ B, E, K, I_2 सारं W, Sc.

प्रविश्य प्रतीहारी। भट्टा[1] एसो को वि वलीमुहो रामस्स[2] दूदो[3] त्ति[4] भणिअ[5] पडी[6]हारदेसे[7] चिट्ठ[8]दि ॥

राव°। सावज्ञम्। वलीमुखः[9]। प्रवेशय ॥

प्रती°। तहा। इति निष्क्रम्याङ्गदेन सह प्रविश्य। तं प्रति। एसो भट्टा[10]। उवसप्प ॥

अङ्गदः। उपसृत्य। जयति जयति परममा[11]हेश्वरो लङ्केश्वरः ॥

राव°। सुग्रीवानुचरो भवान् ॥

अङ्ग°। [12]नहि नहि ॥

[13]राव°। तर्हि कस्य ॥

अङ्ग°। लङ्केश्वर श्रूयतां योऽहं[14] यदर्थमागतश्च ॥

दृप्यद्राक्षसचक्रकाननमहादावानलस्याज्ञया
दूतो दाशरथेस्तदीयवचसा त्वामागतः शासितुम्।
सीतां मुञ्च भजावरोधनसुहृद्दायादपुत्रान्वितः
सौमित्रेश्चरणौ न[15] चेत्तदिषुभिः शासिष्यसे दुर्मदः ॥२०॥

राव°। सहासम्। वलीमुखोऽपि वाचाटः। किं वक्तव्यम् ॥

---

1 भट्टा K, W, Sc, B भद्रा I_2 महाराअ E.

2 रामस्य for रामस्स B only.

3 दूतो B, E दूदो K, W, Sc, I_2.

4 ति for त्ति E only.

5 भणीअ E भसिअ W भणिअ cett.

6 पडि° for पडी° E only.

7 °देसे B, E, K °देशे W, Sc, I_2.

8 चिट्ठिदि Sc, I_2 चिट्ठदि cett.

9 °मुखं for °मुखः W only.

10 भट्टा उवसप्प K, Sc, I_2 भट्टा उपसप्प E भट्टा उवसर्प W भट्टाणुवसप्प B.

11 °माहे° K, W, Sc, I_2 °महे° B, E.

12 नहि B नहि नहि cett.

13 राव°। तर्हि कस्य। अङ्ग°। om. E only.

14 योऽयं for योऽहं E only.

15 च for न E only.

अङ्ग॰। अहं यत्किञ्चित् स्याम्। त्वं तु सिद्धान्तमेवावधारय[1]।

तत्पादाञ्जनखं[2] किं वा तत्तीक्ष्णेषु मुखं नताः।
स्रष्टारस्तेऽद्य[3] मूर्धानस्तयोरभिमतं वद ॥२१॥

राव॰। सक्रोधम्। कः कोऽत्र भोः। यत्किञ्चिद्वादिनोऽस्य मुखं संस्कुर्यात्॥

प्रह॰। देव दूतः किलायम्। किमत्र क्रोधेन॥

राव॰। एतन्मुखसंस्कार एव तपस्विनः प्रत्युत्तरीकरणम्[4]॥

अङ्ग॰। उद्रोमकूपस्फुरणमभिनीय[5][6]।

यथासङ्ख्यं[7] तीक्ष्णक्रकचविषमक्रूरनखर-
प्रगल्भव्यापारप्रमथितसिराबन्धशिथिलैः[9]।
शिरोभिस्ते दिग्भ्यो वलिमनुपहृत्यैव किमहं
निवर्तेयं[10] स्यां चेन्न रघुपतिदूत्येन परवान्॥२२॥

[11]इत्युत्प्लुत्य निष्क्रान्तः॥

[12]राव॰। निरूप्य। अहो जातिसुलभं चापलमप्रतीकार्यम्॥

प्रह॰। देव निदेशाक्षरमालिकापरिग्रहायोत्कण्ठते हृदयम्॥

---

[1] ॰मेव धारय for ॰मेवावधारय B only.

[2] तत्पादाञ्जनखस्ते वा तत्तीक्ष्णेषु मुखं तव B तत्पादाडवन इवं किं वा तत्तीक्ष्णेषु मुने ताः E तत्पादाञ्जनखं किं वा तत्तीक्ष्णेषु मुखं नताः K, W, Sc, I_2.

[3] स्रष्टारोऽद्यैव B स्रष्टारतेद्य E स्रष्टारस्तेऽद्य corr. to स्रष्टारस्तेऽद्य W स्रष्टारस्तेऽद्य K, Sc, I_2.

[4] ॰त्तरीरकरणं B ॰त्तरीकरणीयं E ॰त्तरीकरणं K, W ॰त्तरीकारणं Sc, I_2.

[5] उपेद्रकूपः स्फुरण॰ E उद्रोमकूपस्फुरण॰ Sc उद्रोमकूपःस्फुरण॰ I_2 उद्रोमकूपस्फुरण॰ W, K, B.

[6] ॰मभिमीय for ॰मभिनीय B only.

[7] ॰सख्यं for ॰सङ्ख्यं B only.

[8] ॰विषयम॰ for ॰विषम॰ B only.

[9] ॰व्यापारं for ॰व्यापार॰ E only.

[10] निवर्तेयं स्यां B, K निवर्तेयं स्या E निवर्तै यत्स्यां W, Sc, I_2.

[11] इत्युत्प्लुत्य E, K इत्याप्लुत्य W, Sc इत्यप्लुत्य I_2 इत्यु B.

[12] राव॰। . . . निदेशः (l. 1, next page) om. K.

राव॰। किमत्रापि प्रष्टव्यो निदेशः[1]।

त्रोट्यन्तामभितोऽर्गलानि[2] भुवनप्रख्यातसारोद्धतैः
पाट्यन्तां परितोऽररागि[3] च परुषाक्षेपिभी[4] राक्षसैः।
मण्ड्यन्तां[5] रिपुघस्मरप्रहरणालङ्कारभङ्ग्या[6] भुजाः[7]
खण्ड्यन्तां च मुहुर्विवल्गनवृथोत्थानोत्कटा[8] मर्कटाः ॥२३॥

प्रह॰। यदाज्ञापयति महाराजः[9] ॥ इति निष्क्रान्तः ॥

नेपथ्ये महान् कलकलः। सर्वे ससम्भ्रममाकर्णयन्ति[10] ॥

पुनर्नेपथ्ये।

वध्यन्ते[11]ऽसप[12]पुङ्गवाः प्रतिभया[13]भोगैः प्लवङ्गाधिपै-
र्बध्यन्ते च वितर्दिकाः प्रतिदिशं कृत्तैरदो[14]मूर्धभिः।
छिद्यन्ते[15] च बहिःप्रपित्सव इमे मध्ये क्रुधान्धाः क्षणाद्
भिद्यन्ते पुरगोपुराः प्रतिदिशं क्षिप्तैश्च गण्डोपलैः ॥२४॥

राव॰। [16]ऊर्ध्वमवलोक्य सक्रोधमुत्थाय च। कथमेते तपस्विपक्षपाता-

---

[1] निवेशः for निदेशः E only.

[2] त्रोत्यन्ता॰ K, W, Sc, I_2 तोड्यन्ता॰ E भज्यन्ता॰ B.

[3] ॰तोऽररागि B ॰तो रणानि E, K, W, Sc, I_2.

[4] ॰भीमाक्षसैः for ॰भी राक्षसैः E only.

[5] मथ्यन्तां W, Sc मण्ड्यन्तां cett.

[6] ॰प्रहरणालङ्कारभङ्ग्या E, K ॰प्रहरणं। लङ्कारभङ्ग्या B ॰प्रहरणं विक्षोभ्य भङ्ग्या W, Sc ॰प्रहरणं विक्षोभ्यन्ते भङ्ग्या I_2.

[7] After विक्षोभ्य W and Sc and after विक्षोभ्यन्ते I_2 add: तद्देवि त्वमभ्यन्तरे प्रविश। अहमपि तावत् कैश्चिल्लङ्कारक्षकैः (om. last क्षकैः I_2).

[8] ॰थोत्पानो॰ E ॰थोच्छानो॰ Sc ॰थोत्थानो cett.

[9] देवि for महाराजः E only.

[10] ससम्भ्रममा॰ E, K, Sc सम्भ्रममा॰ W सम्भ्रमा॰ I_2.

[11] वध्यन्ते I_2 बन्ध्यन्ते E वध्यन्ते cett.

[12] ॰स्रप॰ K, W, Sc ॰स्त्रैप॰ I_2 ॰स्तप॰ E ॰सुर॰ B.

[13] प्रतिसमंया॰ for प्रतिभया॰ E only.

[14] ॰रदो॰ corr. to ॰रहो B ॰रदो cett.

[15] चिप्यन्ते B क्षिद्यन्ते E छिद्यन्ते cett.

[16] ऊर्ध्वमवलोक्यसक्रोधमुत्थाय च K ऊर्ध्वमवलोक्य सक्रोधं E सक्रोधमुत्थाय ऊर्ध्वमवलोक्य च B ऊर्ध्वमवलोक्य सक्रोधमुत्प्रेक्ष्य च W, Sc, I_2.

दनात्मज्ञा वासवपुरःसरा दिवौकसोऽपि मत्सरेण[1] विक्षोभ्यन्ते[2]। तद्देवि त्वमभ्यन्तरे[3] प्रविश। अहमपि तावत्

कैश्चिद्दोर्भिः प्रमत्तान् प्लवगपरिवृढान् दिक्षु विक्षिप्य दक्षै-
रन्यैः पिष्ट्वापि युद्धाभिनय[4]विधिनटौ[5] तौ तपस्विप्ररोहौ।
शिष्टैः कृष्ट्वा[6] स्वचेतःप्रतिफलितवृथारम्भमात्रप्रविष्टान्
दुष्टांस्त्रैविष्टपानप्यपगतकरुणस्तैः[7] पिपर्मि[8] स्वकाराम्[9]
॥२५॥

इति विकटं परिक्रम्य[10] निष्क्रान्तः॥

ततः प्रविशति रथेन सपरिवारो वासवः सूतश्च॥

[11]मातलिः। देव दिवस्पते[12]। यथा तावदधिलङ्घ्मेषः
संवर्त[13]प्रकटविवर्तसप्तपाथो-
नाथोर्मिव्यतिकरविभ्रमप्रचण्डः।
निर्घोषः स्फुरति भृशं परःसहस्र[14]-
व्यावल्गत्प्रबलगतागतास्नपाणाम्[15] ॥२६॥
तथा तर्कये युयुत्सया निर्ययासति नक्तञ्चरचक्रवर्तीति॥

---

[1] मत्सरेणो Sc मत्सरिणो W मत्सरेण cett.

[2] विक्षुभ्यन्ते W, Sc विक्षोभ्यन्ते cett.

[3] °भ्यन्तरं B °भ्यन्तरमेव E °भ्यन्तरे cett.

[4] °विनय° for °भिनय° K only.

[5] °गतौ E °नदौ I_2 °नटौ cett.

[6] छष्टान् B छष्टा I_2 छष्ट्वा cett.

[7] °करुणैस्तैः B °करुणरतैः E °करुणस्ते I_2 °करुणस्तैः K, W, Sc.

[8] पिपर्मि B, E, K, I_2 बिभर्मि W, Sc.

[9] कारा स्याद्बन्धनालये add. along margin, Sc.

[10] परिष्क्राम्य for परिक्रम्य B only.

[11] मातलिः om. B only.

[12] दिवस्य ते B, Sc दिवस्पते cett.

[13] प्रलय by rev. above संवर्त W.

[14] परैसहस्र° corr. to परैःसहस्र B परःसहस्र° cett.

[15] °स्नपा° K, W, B °स्त्रपा° E, Sc, I_2.

वास॰। सूत पश्य[1] पश्य।

दृढतरमभियोगं वीक्ष्य [2]रक्षोविनेता
सह तनुजसग[3]र्भप्रे[4]ष्यैरक्षःसहस्रैः।
सरभसमरराशिं द्रागपावृत्य विद्रा-
वितनिखिलवनौका निर्गतोऽयं नगर्याः ॥२७॥

शब्दश्रवणं नाटयित्वा। आः क एषः कौवेर्याः ककुभः क्वणत्कनककिङ्किणीजालमा[5]लिना [6]विमानेन सरभसमित एवाभ्येति ॥

सूतः। निर्वर्ण्य। देव भवत्येव गन्धर्वरा[7]ज्याधिपत्याभिषेककृतमहाप्रसादश्चित्ररथः ॥

[8]ततः प्रविशति विमानाधिरूढश्चित्ररथः ॥

चित्ररथः। जयति जयति देवराजः ॥

वास॰। गन्धर्वराज समरदिदृक्षानिर्भरं किं चेतः ॥

चित्र॰। तदपि[9] ॥

वास॰। किमन्यत् ॥

चित्र॰। अलकेश्वरनिदेशः ॥

वास॰। कीदृशः ॥

चित्र॰। दुर्वा[10]धो जनिदिवसान्मम प्रवृद्धः
कोऽप्याधिः प्रबलतमोऽथवा त्रिलोक्याः।
तस्येदं निधनदिनं विधेर्विलासात्
कल्याणी परिणतिरस्तु वान्यथा वा ॥२८॥

तदवगन्तुमहं प्रहितः ॥

---

[1] पश्य E पश्य२ cett.
[2] रच्यो for रक्षो॰ I_2.
[3] ॰सगर्भ्य॰ for ॰सगर्भ॰ E only.
[4] ॰प्रेच्य॰ for ॰प्रेष्य॰ E only.
[5] ॰मौलिना B ॰मालिना॰ cett.
[6] विना विमानेन add. B only.
[7] ॰राज्याभिषेक॰ E ॰राज्याधिपत्याभिषेक॰ W, Sc, I_2, B ॰राज्याधिपत्याभिषेके K.
[8] ततः . . . चेतः। चित्र॰ om. E only.
[9] अन्यदपि add. W, Sc only.
[10] दुर्वादो E दुर्वाधो cett.

वास०। [1]सकुल्यानामप्येष मनोरथः ॥

चित्र०। किं चित्रम्। सहजाः किल ते मिथः शत्रवः। कृत्रिमतापि [2]निधिपुष्पकादिहरणवृत्तेन दुर्वृत्तस्य सुप्रथिता। अथवा[3]।

[4]यावत्त्रिलोक्यां किल जन्तुजातं
तत् सर्वमस्योद्धतदुश्चरित्रैः।
कदर्थितं श्रीरघुनन्दनस्य
प्रीत्या विधत्ते विजयप्रतीक्षाम् ॥२९॥

वास०। निरूप्य। गन्धर्वराज यदिदमधित्यका[5]तः सुवेलाद्रेरकाण्ड एव प्रबलकिल[6]किलाकोलाहलमुखरित[7]हरिन्मुखं वलीमुखचक्र[8]मक्रममेवो[9]च्चलितं तथा मन्ये पतितमेव प्रहरणैरिति ॥

चित्र०। देवराज पश्य[10] पश्य।

अयं रक्षोनाथः क्षितिधरशिरोबन्धुरतरे
रथे तिष्ठन् प्रष्ठः[11] प्रध[12]नरसनिष्णातमन[13]साम्।
मुहुर्जीवाघोषैर्बधिरयति दिक्प्रान्तशिखरि-
प्रतिध्वाना[14]ध्मातैर्गगनविवराभोगमभितः ॥३०॥

---

[1] सकलाना० E कुल्याना० K सकुल्याना० cett.

[2] ०पुष्पकापहरणादिकवृत्तेन दुर्वृत्तस्य B ०पुष्पकादिहरणवृत्तैर्न दुर्वृत्तस्य K ०पुष्पकादिहरणवृत्तैर्न दुर्वृत E ०पुष्पकादिहरणवृत्तैर्दुर्वृत्तस्य W, Sc, I_2.

[3] अथवा om. K only.

[4] अथापि यावत् for यावत्त्रिलोक्यां K only.

[5] ०कान्तः B ०कातः cett.

[6] ०किलकिल० B किलकिला० cett.

[7] ०हरिन्मुखं E, W, Sc, I_2 ०करिन्मुखं B ०कोलाहलमुखरं for कोलाहलमुखरितहरिन्मुखं K.

[8] ०चक्रं समेवो० K ०चक्रमक्रममेवो० cett.

[9] ०च्चकितं E ०च्चलितं cett.

[10] पश्य E पश्य२ cett.

[11] पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः added along margin, Sc.

[12] प्रबलरस० B प्रधनरत० E प्रधनरस० K, W, Sc, I_2.

[13] ०मनसा E ०मनसान् K ०मनसां cett.

[14] ०नध्मा० E ०नाध्मा० cett.

वास॰। गन्धर्वराज न तुलाधृतस्तावदनयोर्वीरसमयोचितः परिकरः। साविगम्। सूत[1] सूत साङ्ग्रामिकं मे[2] रथमुपहर[3] रामभद्राय। अहमपि गन्धर्वराजाधिष्ठितं विमानमेवाधितिष्ठामि॥

इति तथा करोति॥

सूतः। यदाज्ञापयति देवराजः[4]॥ इति निष्क्रान्तः॥

चित्र॰। देवराज कथमप्रतिसन्धेयं[5] तुमुलम्। तथा हि।

रक्षोभिर्विपिनौकसां परिवृढैश्चारादपास्तक्रमं
मुष्टामुष्टि कचाकचि[6] प्रहरणप्रक्षेपमूढात्मभिः।
प्रारब्धं[7] रणकर्म दुर्धरमिथोनिष्पेषशीर्यद्वपु-
र्निष्ठ्यूतास्रझरीभिरेव[8] सरणिर्[9]दुःसञ्चराभूद्यथा॥३१॥

अपि च।

वीराणां रुण्डरुण्ड[10]प्रविघटनपटु[11]स्फार[12]दोर्दण्डखण्ड-
व्यापारक्षिप्यमाणप्रतिभटविकटाटोपवर्ष्म[13]प्ररूढः।
कूटः कोऽप्येष युद्धाजिरभुवि जरठ[14]श्चित्रकूटानुकारी
लीयन्ते यत्र शत्रुप्रपतनविवशाः कोटिशः पूरकीटाः
॥३२॥

---

[1] सूत E सूत२ cett.

[2] मे om. E only.

[3] ॰मुपाहर B ॰मुपहर cett.

[4] देवः W देवराजः cett.

[5] ॰मतिसन्धेयं K, W, Sc, I_2 ॰मप्रतिसन्धेयं B ॰मसि सन्धयं E.

[6] ॰काच B ॰कचि cett.

[7] प्रारम्भं K प्रारब्धं cett.

[8] ॰नदी॰ for ॰झरी॰ K only.

[9] सरिणी E सरणिर् cett.

[10] तुण्डतुण्ड॰ B रुण्डउण्ड॰ I_2 रुण्डतुं॰ E रुण्डतुण्ड॰ K, W, Sc.

[11] ॰पटल॰ E ॰पटु॰ cett.

[12] ॰स्फुरद्॰ E ॰स्फार॰ cett.

[13] ॰वर्षा॰ for ॰वर्ष्म॰ E only.

[14] जठर॰ B जरठ॰ cett.

वास॰। गन्धर्वराज इत[1] इतः।

[2]प्रासप्रोतप्रवीरोल्वणरुधिरपरामृष्टबुक्काजिघत्सा-
धावद्गृध्राधिराजाप्रतिमतनुरुहच्छायया वारितोष्णाः[3]।
विश्राम्यन्ति क्षणार्धं प्रधनपरिसरेष्वेव मुक्ताभियोगा[4]
धीराः शस्त्रप्रहारव्रणभररुधिरोद्गारदिग्धाखिलाङ्गाः ॥३३॥

इतोऽपि।

प्रतीक्षन्ते धीराः प्रतिमुखमुरोभिः[5] सरभसं
विपक्षाणां हेतीः[6] प्रतिनियतधैर्यानुभवतः[7]।
विदीर्ण[8]त्वग्भारा[9] दलितपिशिता[10]च्छिन्नधमनि-
प्रकाण्डास्थिस्नायु[11]स्फुटतरविलक्ष्यान्त्र[12]निवहाः ॥३४॥

चित्र॰। देवराज अपूर्वोऽयं रक्षःपतेः सङ्ग्रामावतरणसर्गः।

तथा हि।

प्रेष्याः[13] सङ्ग्रामसीमन्यनुजशतवृतो[14] मेघनादोऽपि पार्श्वे
वामेऽन्यत्र प्रवीरेष्वतिविषममदो[15] बोधितः कुम्भकर्णः।
कैकस्या[16] बन्धुवर्गोऽप्ययमतिविकटः पृष्ठतस्तिष्ठमानोऽ
ध्यास्ते मध्यं[17] निषण्णो रथशिरसि भृशं विन्ध्यवद्दुर्विगाहः
॥३५॥

---

[1] इत om. I_2 only.

[2] प्रासप्रोत॰ B, K, Sc, I_2 प्रातःप्रोत॰ W मासपोत॰ E.

[3] वारितोष्णाः B, E, K वारितोत्थाः W, Sc, I_2.

[4] मुक्ताभियान्धा B मुक्ताभियोगा cett.

[5] ॰मरोभिः I_2 ॰सुराभिः E ॰मुरोभिः cett.

[6] हेतिः E हेतीः cett.

[7] ॰नुभवः E ॰नुभवतः cett.

[8] विदीर्णं W विदीर्ण॰ cett.

[9] ॰भारान् B ॰भारा cett.

[10] ॰शित॰ W शिता॰ cett.

[11] ॰स्थिन्ना॰ E ॰स्थिस्नायु॰ cett.

[12] ॰लक्ष्यांत्र॰ E ॰लक्ष्यान्त्र॰ cett.

[13] प्रेक्ष्यः W, Sc प्रेष्याः cett.

[14] ॰व्रतो Sc, I_2 ॰वृतो cett.

[15] ॰विषममदो वो॰ E, K, I_2 ॰विषममदो द्बो॰ W, Sc ॰विकटमदो वो॰ B.

[16] विक्रम्या B कैकस्या cett.

[17] मध्यं B, E, I_2 मध्ये K, W, Sc.

वास०। गन्धर्वराज एवमभियोगोद्धुरं द्विषन्तमभिवीक्ष्यापि निष्प्रकम्प एव रामभद्रः। अथवोचितमेवैतत्[1]। यतः

न कम्पन्ते झञ्झामरुति किल वाति प्रतिदिशं
समुन्मूर्छत्साराः कुलशिखरिणः किञ्चिदपि ते।
न मर्यादां तेऽपि प्रतिजहति गाम्भीर्य[2]गरिम-
स्फुरद्वार्ब्रह्माणो[3]ऽकलितमहिमानोऽम्बुनिधयः ॥३६॥

चित्र०। देवराज पश्य[4]।

भक्तिप्रह्वं कथमपि यवीयांसमुत्सृज्य चापा-
रोपव्यग्राङ्गुलिकिसलयं मेघनादक्षयाय।
[5]लक्ष्यीकृत्य प्रधनकुशलं सानुजं राक्षसेन्द्रं
जीवां भूयो रघुपतिवृषा स्पर्शतः[6] संस्करोति[7] ॥३७॥

कथमेतदतिदुष्करमिव मन्ये। तथा हि।

आक्रम्यैकैकमेते रजनि[8]चरभटाः कोटिशः शस्त्रवर्षै-
र्भास्वद्वंशप्ररोहं पिदधति परितः सत्क्रियायौग[9]पद्याः।

अथवा किं नाम दुष्करम्।

एतावप्युग्रभावावकलितमहिम[10]प्राभवौ युद्धभूमा[11]-
विन्धाते शत्रुशस्त्रप्रविदलनफलस्पष्ट[12]बाणाभियोगौ ॥३८॥

---

1 ०मेव तत् E ०मेवैतत् cett.

2 माभाग्य० E गाम्भीर्य० cett.

3 ०द्वार्ब्रह्माणो B, K, I_2 ०द्वागब्रह्माणो E ०द्वार्ब्रह्माणो changed to ०द्वागब्रह्माणो Sc ०द्वागब्रह्माणो changed to ०द्वारब्रह्माणो W.

4 पश्य २ E only.

5 लक्ष्यी० K लक्ष्मी० E, W लक्षी० B, Sc, I_2.

6 स्पर्शनैः B स्पर्शतः E, W, Sc, I_2 स्पशंतः K.

7 सङ्करोति for संस्करोति E only.

8 रजनी० for रजनि० E only.

9 ०योग० for ०यौग० E only.

10 ०महिम० B, K, Sc ०महिमा० W, I_2 ०महि० E.

11 ०भीमा० corr. to ०भूमा० Sc.

12 ०स्पृष्ट० for ०स्पष्ट० E only.

समन्ततोऽवलोक्य । [1]अहो कथमेते वनौकसोऽपि महति सपत्न-[2]सङ्कट्टे स्वा[3]भिधानयोगमेव व्याख्या[4]न्ति । पञ्चषाः केवलं रामभद्र-पादमूलमासेवन्ते । तथा हि ।

सुग्रीवः स्यन्दनस्याग्रे साङ्गदाः[5] पृष्ठतः पुनः ।
[6]पञ्चषा [7]जाम्बवान् भावी लङ्काधीशोऽपि पार्श्वयोः ॥३९॥

विचिन्त्य । [8]हनूमान् पुनः [9]कनीयांसं काकुत्स्थम् । सविमर्शम् । वरमेत एवोभयथा रामभद्रपादपद्मोपसेविनः । यतस्तावदेतेषां[10]

स्वामिभक्तिश्च धैर्यं च [11]व्याख्याते गात्रमक्षतम् ।
रक्षोऽभियोगस्त्वन्येषां दृश्यते [12]दैन्यमप्यलम् ॥४०॥

वास॰ । गन्धर्वराज मानुषे लोके वात्सल्यं नाम केवलमखिले-न्द्रियवशीकरणचूर्णमुष्टिः । [13]यतः ।

सौमित्रिः कृतहस्तताप्रभृतिभिर्न्यूनो न [14]कैश्चिद्गुणैः
सारेणापि पुनः प्रसिद्धमहिमा [15]शौर्योष्मणा रावणिः ।
इत्थं तुल्यतरे किल व्यतिकरे रामस्य रक्षःप्रभो-
श्चान्योन्यं शरवृष्टिरेव वलते दृष्टिस्तयोर्वत्सला ॥४१॥

---

[1] अह for अहो E only.

[2] ॰सङ्घट्टे B, K, E ॰सन्यहे I_2 ॰सङ्गरे W, Sc.

[3] स्वाभिधान॰ E, B, W, Sc, I_2 स्वसन्निधान॰ K.

[4] व्याख्यान्ति B, E, K, I_2 ख्यापयन्तः W, Sc.

[5] सोऽङ्गदः B सीङ्गदः Sc सागदाः E साङ्गदः corr. by rev. to साङ्गदाः W साङ्गदाः K.

[6] पञ्चषा K, E, W, Sc, I_2 अग्रे तु B.

[7] जाववान् B जाम्बवान् K, W, Sc जाम्बुवान् E जीववान् I_2.

[8] हनू॰ B, E, K, Sc, I_2 हनु॰ W.

[9] कनीयःसं for कनीयांसं B only.

[10] ॰देतयोः for ॰देतेषां B only.

[11] व्याख्यातो for व्याख्याते W only.

[12] दैवम॰ for दैन्यम॰ K only.

[13] यतः om. B only.

[14] कश्चि॰ for कैश्चि॰ E only.

[15] शौर्योष्मणा B, E, K, I_2 शौर्याग्रणी W, Sc.

चित्र॰। देवराज युक्तमेवैतत्। एवं वात्सल्यमनुरुध्यन्ते किल महात्मानः। साद्भुतौत्सुक्यम्। पश्यतु देवराजः।

सौमित्रेर्बाणवज्रैरधिकतरममी मर्मवेधं प्रविद्धा
धावन्तः क्ष्माधरेन्द्रा इव रजनिचराः शेरते युद्धसीम्नि।
रक्षोनाथोऽपि पुत्रान् कतिचन पतितान् वीक्ष्य रामाभियोगं
सन्त्यज्यानिष्टशङ्की[1] निपतति तरसा[2] मेघनादोपकण्ठम् ॥४२॥

तदेतदत्याहितमाशङ्के ॥

वास॰। गन्धर्वराज किमत्र नामात्याहितम्। अपरिच्छेद्यमहिमानः किलैते ककुत्स्थ[3]कुलप्ररोहाः। तथा हि।

परःसहस्रं[4] रजनीचरेन्द्रा
यथास्य वीरस्य किलैकलक्ष्यम्।
तथा रणेष्वद्भुतवीरगोष्ठी-
भूषायमाणो दशकन्धरोऽपि ॥४३॥

चित्र॰। देवराज बहुभिरेकस्याभियोगेऽपि शुभोदर्कतेत्येत[5]दबहुव्यक्तिनिष्ठम्। सचमत्कारम्। इतोऽवधत्तां[6] देवराजः।

रक्षोनाथे सरभसमितो निर्गते विग्रहेच्छुः
क्षुभ्यत्युच्चै रघुपतिशरैः कीलितः कुम्भकर्णः।
कुम्भोऽप्येतां पितुरुपनतां वीक्ष्य वश्यां वपुष्मान्[7]
गर्वैः किं वा निपतति[8] जवाज्जङ्गमः क्ष्माधरेन्द्रः ॥४४॥

---

1 °शङ्कां for °शङ्की E only.
2 रभसात् for तरसा K only.
3 काकु° for ककु° E only.
4 °सहस्र° for °सहस्रं° E only.
5 °दर्कानि एतद° for °दर्कतेत्येतद° E only.
6 इतो धावतां for इतोऽवधत्तां E only.
7 वपुष्मान् गर्वैः K, W, Sc, B वपुष्मानार्तैः E चपुष्मान् वेगैः I_2.
8 वा निपतति K, W, Sc, I_2, B वापि पतति E.

साद्भुतम्। अहो छिद्रस[1]ञ्चारिता मर्कटजातेः। यतः।

उद्दिश्याराद्दशरथकुलाङ्कूरमाद्यं पतन्तं
[2]दृप्तं कुम्भं मृधभुवि कपिः कोऽपि मध्ये रुरोध।

सविशेषं निर्वर्ण्य। कथं सुग्रीव एव। सविचिकित्सम्।

दोःस्तम्भाभ्यां सरभसमथापीड्य विक्षिप्य भूमौ
क्रान्त्वाप्येनं प्रति[3]घवि[4]वशं माषपेषं पिपेष ॥४५॥

साशङ्कम्।

[5]एतन्निरीक्ष्य निपपात च कुम्भकर्णः
सुग्रीवमुग्रतरविद्रुतिरग्रहीच्च।
उन्मोच्य सोऽपि निपुणः स्वमसुष्य नासां
लज्जां स्वसुश्च युगपत् किल निश्चकर्त ॥४६॥

वास°। गन्धर्वराज इत[6] इतः॥

लघुरघुपतिरेष राक्षसाना-
मधि[7]भुवि किं च कुमारमेघना[8]दे।
किमपि चरित[9]मद्भुतं व्यतानीत्
सपदि यथा प्रतिघान्धतामधा[10]ताम् ॥४७॥

अहह। इदमतिदुष्क[11]रं प्रति[12]संविधानमापतितमस्य रघुशिशोः। तथा हि।

---

[1] °चारता for °सञ्चारिता E only.

[2] दृप्तं B, E, K सप्तं I_2 सत्यं W, Sc.

[3] कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियौ added along margin by Sc.

[4] °विवशं E, K °विवशो cett.

[5] एवं निरी° for एतन्निरी° E only.

[6] इत om. K only.

[7] °मपि भुवि E °मधिभुवि cett.

[8] °नादे B, E, K, I_2 °नादं W, Sc.

[9] °ताद्भुतं for °तमद्भुतं W only.

[10] °मधातां B, K, I_2 °मधत्तां corr. to °मधातं W °सधत्तां E °मधात्तां Sc.

[11] °दुष्कारं E, K, I_2 °दुष्कार° W, Sc °दुकर° B.

[12] प्रतिसंविधान° W, Sc, K, B प्रति-सान्धान° E प्रतिशंविधान° I_2.

यावन्मन्त्रप्रभावाद्दु[1]रधिगमगतीन् मेघनादप्रणुन्नान्
दुर्भेद्यान्नागपाशान् विहगपरिवृढास्त्र[2]प्रयोगाद्व्यधूनोत् ।
तावद्रक्षोविनेत्रा पुनरतिरभसं मर्मणि क्रोधभूम्ना
गाढं विद्धः शतघ्न्या[3] हनुमति सहसा मोहनिघ्नो[4] न्यपप्तत् ॥४८॥

चित्र॰। देवराज अयमत्राद्भुततरो विमर्दः । यदा तु भ्रातुर्मोहमधिगम्य भाविलङ्केश्वराद[5]क्रममेव करुणवीरानुभावभावितचित्तवृत्तिस्तथाविधस्यापि दर्शनोत्सुकः समरुध्यत[6] परितः कुम्भकर्णप्रमुखया[7] रक्षःपृतनया तदा पुनरिदमेव प्रत्यकार्षीत् । तथा[8] हि ।

पुरां[9] जेता[10] पूर्वं त्रिपुरविजये यामुदवहत्
स्थितिं तामेवा[11]यं रघुपतिवृषाश्रित्य वपुषा ।
क्षणाद्रक्षोनाथानु[12]जमिषुभिराच्छिद्य करणश्रमं
भस्मीकृत्याप्यनु[13]जमभियात्युत्सुकतमः ॥४९॥

निर्वर्ण्य। अहो[14] वात्सल्यमहिमा रघुपुङ्गवस्य येन पुनर्विषयीकृतमात्रा[15]मेवानुजस्यावस्थामभिजानाति स्म । परितो निरूप्य। सहर्षम्। दिष्ट्या स्वस्ति रघुकुलकुमाराभ्यामेताभ्यामुत्पश्यामि यतस्तावदेत-

---

1 °द्दुरधिगमगती° K °दुरधिगमगती° B °दुरधिगमनती° E °द्दरधिगमगती° I_2 °द्दनधिगमगती° W, Sc.

2 °वृढोऽस्त्र° E, I_2 °वृढास्त्र° cett.

3 शतघ्न्यां E शतघ्न्या cett.

4 °निघ्नोऽभ्यपप्तत् B °निघ्नोन्यपप्तत् K, E, I_2 °निघ्नेऽप्यपप्तत् W, Sc.

5 °रादक्रममेव B, E, K °रदक्रममेव I_2 °रदत्तक्रममेव Sc °रचक्रममेव corr. to °रदत्तक्रममेव W.

6 समरुध्यते B समनुरुध्यत E समरुध्यत K, W, Sc, I_2.

7 °मुखया E °प्रमुखया cett.

8 तथा हि om. B only.

9 पुरां K, E, W पुरा B, I_2 पुरं Sc.

10 जिता Sc जेता cett.

11 °मेवाद्यं W °मेवायं cett.

12 °नाथोऽनुज° E °नाथानुज° cett.

13 भस्मीकृत्याप्यनुज° B, K, Sc, I_2 भस्मीकृत्यानुज° W भस्मीकृत्वाप्यनुज° E.

14 अवो E अहो cett.

15 °मात्राभवे अनुज° E °मात्रामेवानुज° cett.

योरस्मिन्[1] व्यसनमहार्णवे[2] यातुधानाधीशेनापि सपरिवारेण कुम्भकर्णवधात् सम्भ्रान्तम् । पुनरेतौ निर्वर्ण्य । कथमद्यापि प्रसुप्तावेव । विषमो[3] व्यसनव्यतिकरस्तावदापतितः । यतः ।

बहुच्छलानि रक्षांसि रिपुर्वस्तूवरौ[4] स्वयम् ।
एषावस्थापि[5] कपयः सहायास्तेऽपि विक्लवाः ॥५०॥

तत् किमुपक्रमं दैवमचेति[6] न [7]जाने ॥

वास० । गन्धर्वराज किमेवमाशङ्कसे । पश्य । जाम्बवत्प्रतिबोधितः[8] किलायमचिन्त्यमहिमप्रथिमा[9] प्राभञ्जनिः । सम्प्रति[10]

उत्स्फूर्जद्रोमकूपः[11][12] प्रलयपरिमिलत्पांसुवर्षानुकारी[13]
किञ्चिद्भुग्नाग्रपुच्छाप्रतिमविवलनापास्तनक्षत्रचक्रः[14][15] ।
भूम्नौत्सुक्यानुरूपव्यवसितिरधिकं पर्यवप्लुत्य[16] गत्वा
क्वापि प्राञ्चः क्षणार्धात् कमपि गिरिमसावाहरन्नाजगाम[17]
॥५१॥

---

1 ०रस्मिन् B ०रन्यस्मिन् cett.

2 ०व्यसन० om. B only.

3 विषमो व्यसनव्यति० B, E, K विषमो व्यनव्यति० I_2 विषमे ध्यानव्यति० W, Sc.

4 ०वस्तूवरौ B, K ०वस्तवरौ I_2 ०वस्तु वरौ E ०वस्तवशी Sc ०वस्त्ववशौ W.

5 एषवस्था० E एषावस्था० cett.

6 देव० E दैव० cett.

7 ज्ञायते B जाने cett.

8 जाम्ववत्प्रति० B जाम्बत्प्रति० K जीववत्प्रति० E, Sc, I_2 जीवत्प्रति० W.

9 ०महिमप्रथिसा B, E, K ०महिमा प्रथमा I_2 ०महिम्ना प्रथमः W ०महिम्नां प्रथमः Sc.

10 हि add. E only.

11 प्रस्फूर्ज० K उत्स्फुर्ज० E उत्स्फूर्ज० cett.

12 ०कूपः W, Sc, E ०कूप B, K, I_2.

13 ०त्पांसु B, E, Sc, I_2 ०त्पांस्रु W, K.

14 ०भुग्नाङ्ग० E ०भुग्नाग्र० cett.

15 ०विवकरा० B ०विवलना० cett.

16 पर्युम्पप्लुत्य E पर्यवप्लुत्य cett.

17 ०मसौ वाहयन्ना० B ०मसावाहरन्ना० cett.

चित्र॰ । विभाव्य । सोल्लासम् । देवराज पश्य[1] पश्य ।

यथा चन्द्रालोकं कुमुदनिवहश्चुम्बकमणिं
दृषत्सारस्त[2]स्त्वामृतमपि भवाम्भोनिधिगतः ।
तथा सम्भा[3]व्यैतौ हनुमदुपनीताद्रिमरुतं
झटित्युज्जृ[4]म्भेते किमपि गहनो वस्तुमहिमा ॥५२॥

दक्षिणतो विभाव्य । कथमेष लङ्केश्वरः कल्पा[5]वसाननिर्मर्यादं पाथ[6] इव पाथोनाथस्य राक्षसबल[7]माकर्षन् पुनर[8]भ्यमित्रम[9]भ्येति । विमृश्य । सम्प्रति तु धर्मयुद्धसम्भावना[10] । प्रतिहतबहुतरप्रधानव्यक्ति रा[11]वणमेघनादशेषमेतद्राक्षसबल[12]मेतावप्युभौ न [13]गणयेते किं[13a] पुनः परःसहस्रमप्यल्पकीटाः । पुनर्लक्ष्मणं निर्वर्ण्य । [14]एष तु

शाणोत्कीर्णो मणिरिव घना[15]म्भोदमुक्तो विवस्वान्
निःकोशोऽसिर्झटिति विगलत्कञ्चुकः पन्नगेन्द्रः ।
दी[16]व्यत्युच्चैर्लघुरघुपतिः किं नु वा स्यात् किमन्यद्
दिव्यौषध्या ज[17]यति महिमा कोऽप्यचिन्त्यानुभावः ॥५३॥

---

1 पश्य पश्य B, E पश्य only, cett.

2 ॰रस्तत्त्वामृत॰ K ॰रस्तंत्वामृत॰ B ॰रस्तत्वां मृत॰ E ॰रस्तत्वामृत्वामृत॰ I_2 ॰रःसुत्वामृत॰ W ॰रसुत्वामृत॰ Sc.

3 ॰व्यैतौ I_2 ॰व्यैतौ cett.

4 ॰भन्ते E, W ॰म्भेते cett.

5 कल्पना॰ I_2 कल्पा॰ cett.

6 पाम्ध W पाथ cett.

7 ॰बलमाकर्षन् B, K, Sc ॰बलं माकर्षत् W, I_2 ॰बलप्रकर्षन् E.

8 ॰भ्यमित्रम॰ B, E, K, I_2 ॰भ्यमित्र्यम॰ W ॰भ्यमित्रम॰ changed to ॰भ्यमित्र्यम॰ Sc. Added along margin: जैत्रस्तु जेता यो गच्छत्यलं विद्विषतः प्रति । सोऽभ्यमित्र्यो ऽभ्यमित्रीयोऽप्यभ्यमित्रीण इत्यपि Sc.

9 ॰मध्येति corr. to ॰मभ्येति W.

10 ॰वना । प्रति॰ B ॰वनाप्रति॰ cett.

11 रावणं E, I_2 रावण॰ K, W, Sc, B.

12 ॰बलमेतावप्युभौ B, E, K, I_2 ॰बलमेताभ्यामवगणितमित्येतावप्युभौ W, Sc.

13 गणेते B गणन्ते K, W गणयन्ते E, Sc, I_2.

13a किं पुनः om. all but E, K.

14 एष B, E, K एवं W, Sc एव I_2.

15 घनान्तादिमुक्तो B घनाभ्रामुक्तो E घनाम्भोदमुक्तो K, W, Sc, I_2.

16 दीव्य॰ K, E, Sc, I_2 दिव्य॰ W दीप्य॰ B.

17 जगति E जयति cett.

निरूप्य। कथं प्रक्रान्तमेव कपिराक्षसनासीरचरयोर्भटयोः पुनरायोधनम्। तथा हि।

[1]शितैर्बाणैरेके मृधभुवि परे तीक्ष्णनखरैः
क्रियासातत्येनाप्यहमह[2]मिकाक्रान्तमनसः।
मिथो वि[3]ध्यन्ति स्म[4] प्रबलतमसम्मर्दविदलत्-
[5]क्षितिक्षोदैः पिष्टा[6]तकसुरभिवक्षस्तटभृतः ॥५४॥

सविशेषं निश्चित्य। तावदन्त[7]रमनयोर्बलयोरधिगं[8]स्यमानप्रातःसन्ध्ययोर्यावदन्धतमसारुणालोकयोः। तथा हि।

प्रतिक्षणमियं रक्षःपृतना क्षीयतेतराम्।
[9]तथा तथा प्लवङ्गा[10]नां सेनानन्तगुणैधते ॥५५॥

वास°। गन्धर्वराज पुनरितो महत् कदनमुपक्रान्तम्।

रक्षोनाथो रघूणां त्वरितमधिभुवा रावणिर्लक्ष्मणेन
द्वन्द्वीभूय प्रहृष्यद्भुजबलमहिमाविष्कृते[11]ष्वासशिक्षौ।
दि[12]व्यास्त्राणां प्रयोगं[13] प्रतिकृतिसुचितां चाप्नु[14]वानौ मिथोऽमू
मूर्छत्कल्पावसानज्वलनपरिभवं सैन्ययोः पर्यदा[15]ताम् ॥५६॥

---

[1] शिवै° E, I_2 शितै° cett.

[2] Added along margin : अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः Sc.

[3] विन्ध्यन्ति E, W विध्यन्ति cett.

[4] स्व E स्म cett.

[5] °चितिचोदै K °चितिचोदः W, Sc, I_2 °चमाधूली° B.

[6] पिष्टातक° K, Sc, I_2 पिष्ठातक° W पिष्टान्तक° B पिष्टात° E. Also added along margin : पिष्टातः पटवासकः इत्यमरः Sc.

[7] °दन्तरसैनयोर्वलयो° B °दन्तरमनयोर्वलयो° cett. [°गम्यमानं W, Sc.

[8] °गंस्यमान° B, K, I_2 °गम्यमान° E

[9] तथा B, E, K, I_2 यथा W, Sc.

[10] °नां सेनानन्तगुणैधते B °ना तत्र गुणैधते K °ना त गुणैधते E °नामनन्तगुणैधते W, Sc °नानन्तगुणैधते I_2.

[11] °तेष्वास° E °तेष्वास° K °तस्वास° B °तेस्वास° prob. corr. to °तेष्वास° W °तेस्वास° Sc, I_2.

[12] शस्त्रा° B दिव्या° cett.

[13] प्रयोगं B, E, K, I_2 प्रयोग° W, Sc.

[14] चाप्नुवानौ B चाप्णुवानौ K, I_2 चाप्नुवानौ W, Sc चाप्णुर्वानौ E.

[15] पर्यदातां K, I_2 पर्यदात्तां W, Sc पर्यटातां E पार्षदानी B.

चित्र० । देवराज[1] दुरवबोधोऽयमनयोर्महावीरयोर्[2] मिथोविमर्दः । तथा हि ।

क्ष्वेडाभिः[3] ककुभः[4] पृषत्कनिकरैर्[5] व्योम द्विधाखण्डितै-
र्देहैर्विद्विषतां धरातलमपि प्रच्छादयन्तौ चिरम्[6] ।
कुर्वाते ऽश्रुजलाविलेक्षणपथान्येतावकाण्डोच्चर-
द्रोमाञ्चानि[7] सवेपथून्यपि मुहुर्वर्ष्माणि नः पश्यताम्
॥ ५७ ॥

सविशेषं विभाव्य । कथं प्रत्यक्षानुमानाभ्यामुपलभ्यमानमेकमेव[8] वस्तु विप्रकृष्टान्तरं[9] सम्पद्यते । तथा हि ।

अस्माद्[10] रावणवृत्ताद्[11] राघववृत्तं तु दशगुणं वीक्षे[12]
अनुमन्ये ऽनन्तगुणं पार्श्वपतत्कौणपेन्द्रविनिपातैः ॥ ५८ ॥

परितो निरूप्य । सकुतुकाश्चर्यम् ।

यावन्तो रजनीचराः प्रहरणोद्गूर्णभुजाकेतवो[13]
युध्यन्तोऽभिमुखाः[14] स्फुरद्भुजमदाध्माताः पुरो निर्गताः ।
प्रक्षिप्ताशुग[15]जालपक्षपवनाधूते प्रतापानले[16]
चित्रं दाशरथेः क्षणाच्छलभतां यान्ति स्म सर्वेऽपि ते
॥ ५९ ॥

---

[1] देव B देवराज cett.
[2] ०वीर्ययो० B ०वीरयो० cett.
[3] Added along margin: क्ष्वेडा तु सिंहनादः स्यादित्यमरः Sc.
[4] ककुदः E ककुब K ककुभः cett.
[5] पृषद्भ० E पृषत्क० cett.
[6] भृशं for चिरं B only.
[7] ०ञ्चानि B, E, W ०ञ्चाणि K, Sc, I_2.
[8] ०मानमेव K ०मानमेकमेव cett.
[9] ०कृष्टतरं E ०कृष्टान्तरं cett.
[10] असद् E असद् corr. to अस्माद् W अस्माद् cett.
[11] ०वृत्तान्ताद् B, E ०वृत्ताद् cett.
[12] वीक्ष्य for वीक्षे E only.
[13] ०जाकेतवो Sc, B ०जाकेतवो W ०जाः केतवो E, K, I_2.
[14] ०न्तेऽभि० E ०न्तोऽभि० cett.
[15] ०श्युग० E, K, Sc, I_2, B ०शुग० W.
[16] प्रतापानले K, W, Sc, I_2 प्रतापामले B प्रतापाने E.

सविमर्शम्। एवं किलेयं पाञ्चभौतिको सृष्टिः।

त्रैलोक्यमप्यपर्याप्तं रक्षसां स्थातुमप्यदः।
येषां ते केवलं भूमौ विलि[1]ल्युः पञ्चतां गताः ॥६०॥

वास॰। गन्धर्वराज पश्य[2] विस्मयनीयविप्रलम्भौ किलामू रा[3]वणरावणौ। यतः।

एताभ्यां राघवाभ्यां सकुतुकमिषुभिश्छिद्यमानेषु मूर्ध-
स्वेकस्यैकोऽप्यनन्तः किमु सदृ[4]शगुणो वर्णनीयः परस्य।
ए[5]तत्सम्पश्यतोरप्यतिचिरमनयोः कोऽप्यचिन्त्यः[6] प्रभावो
[7]यन्नोत्साहो न धैर्यं विर[8]मति न शिरश्छे[9]दतः पञ्चिणोऽपि
॥६१॥

नेपथ्ये। भो[10] भो[11] रामभद्र किमद्याप्युपेक्षसे [12]दुर्वृत्तमेनं कथं [13]चैकक्रियासाध्यमेतावन्तम[14]र्थम्[15]। [16]अवधत्स्व तावत्।

भवान् सीतां लोकस्त्रिभुवनगतः प्रीतिमुचितां
कनीयान् पौलस्त्यः पुरममरतां स्वां पुनरयम्।
किमन्यान्यत् साक्षात्कृतपरमतत्त्वो मुनिगणः
प्रसादप्रोन्मीलन्मुदि मनसि शान्तिं च लभताम् ॥६२[17]॥

---

[1] लिल्युः पञ्चत्वतां K विलिल्युः पञ्चतां [cett.

[2] पश्य२ E पश्य cett.

[3] रावणरावणौ B, E, K रामरावणौ W, Sc रावण I_2.

[4] सदृशगुणो वर्णनीयः B, K सदृशगुणैर्वर्णनीयः E सरसगुणौ वर्णनीयौ W, Sc सदसगुणौ वर्णनीयः I_2.

[5] इत्थं सम्प॰ B एतत्सम्प॰ cett.

[6] ॰न्त्यः प्र॰ B, K, Sc, I_2 ॰न्त्यं प्र॰ E [॰न्त्यप्र॰ W.

[7] यन्नो॰ K यन्नो॰ cett.

[8] वितरति E विरमति cett.

[9] ॰श्छेदतः K, Sc, I_2, B ॰श्छेदने E ॰श्छेदनः corr. to ॰श्छेदतः W.

[10] भो भो . . . कनीयान् (l. 14 below) om. K only.

[11] भो B, E भोः W, Sc, I_2.

[12] दुर्वृत्त॰ . . . तावत् (next l.) *here* om. B.

[13] चैकक्रिया॰ E वैकक्रिया॰ Sc, I_2 वै क्रिया॰ W.

[14] ॰मथ for ॰मर्थं E only.

[15] This stop in I_2 only.

[16] प्रवधत्स्व E अवधत्स्व cett.

[17] Here added नेपथ्याभिमुखमवलोक्य। दुर्वृत्तमेनं कथं चैकक्रियासाध्यमेतावन्तमर्थमवधत्स्व तावत् in B.

चित्र॰ । निशम्य । कथमेष दिव्यर्षिगणोऽप्येतयोर्वधाय राघवौ त्वरयति । अथवा दुर्वृत्तप्रशान्तिः[1] कस्य न मनःप्रसत्त्यै[2] । ससम्भ्रमाद्भुतौत्सुक्यम् । देवराज पश्य[3] ।

आभ्यां ब्रह्माच्युतास्त्रस्मरण[4]सुरभिभिर्मार्गणै राघवाभ्यां
l. 3. *saumitriḥ,* &c. The line contradicts p. 139, l. 5, where Rāma and *not Lakṣmaṇa* casts aside the skeleton of Dundubhi and *not of Kabandha.* I am inclined to take this contradiction as an argument in favour of the conjecture that the two passages do not belong to the same author.

l. 4. *dṛṣṭam,* &c. Cf. p. 133, l. 3 above.

l. 6. Sanskrit *chāyā*: *kiṃ nāma mamottarīyam āryaputreṇa.*

ll. 6–7. *hanūmato haste dṛṣṭam.*

l. 11. *Verse 17.* Cf. *Utt.* III. 11; *Māl.* IX. 22.

l. 3. *sāndrāmṛta*°. Cf. *Māl.* I. 22.

Page 199, l. 5. *yaśaḥ-śarīram*: repeated in *Anar.* I. 6/7.

l. 6. Sanskrit *chāyā*: *katham mama kāraṇāt tādṛśayor api mahānubhāvayor īdṛśo'vasthā-viśeṣo niśamyate.*

l. 11. Sanskrit *chāyā*: *aho katham punar api tā eva rākṣasāḥ śrūyante.*

Page 200, l. 2. *sahya.* Cf. *Ragh.* IV. 53.

l. 3. *āryāvartaḥ.* For the boundaries of this region see *Manu,* II. 22.

l. 5. *uttama-puruṣa*° refers to the Dwarf incarnation of Viṣṇu. Cf. *Śak.* VII. 6; *Vikramorvaśī* I. 19.

l. 13. Sanskrit *chāyā*: *aho kathaṃ dine'pi tārakā-cakram ivaitad dṛśyate.*

Page 201, l. 2. *savimānā*°. The commentators read *sa vimānā*°.

apāstaḥ: the sentence is faulty because of the absence of the subject. As I understand it, we must supply *ati-viprakarṣaḥ* hinted at by *ati-viprakarṣāt* occurring just before. Jv., however, disagrees and supplies *raviḥ* instead. Cf. a similar case, p. 189, l. 8.

l. 3. Sanskrit *chāyā*: *katham gagana-vāṭikāyām phullāni kusumānīva dṛśyante.*

l. 10. *abhyupapannavān*: the usual meaning of the word is 'taken pity on, pitied'; but it seems to have been used here in the very different sense of 'known'.

l. 15. *kṣoṇyā nu*, &c. Cf. *Megh.* I. 18.

Page 202, l. 3. Sanskrit *chāyā*: *aho etat kim apy adṛṣṭapūrvam anyādṛśam eva dṛśyate na mānuṣo nāpi paśuḥ.*

l. 5. *kinnara*. Cf. *Kum.* I. 8.

l. 9. *eka-piṅga* is one of the many names of Kuvera and literally means, 'having a yellow mark' (in place of one eye). His eye was thus changed, through the curse of Pārvatī, on whom he had cast an evil eye. See *Rām.* VII. 13.

l. 10. *upaślokayitum*. Cf. *Anar.* I. 9/10.

Page 203, l. 4. *sumanaś-cakorair*, &c. Fame is here compared to moonlight, which the *cakora* birds are, according to the *kavi-samaya* (*jyotsnā peyā cakoraiḥ*, *Sāh.* 590), said to drink. Cf. *Anar.* I. 36; VII. 70; 110.

l. 7. *yāvat*, &c. Refers to the common Pauranic belief that the earth rests upon the hoods of the serpent Śeṣa. See *Viṣṇu* II. 5, 20; *Mahānāṭaka* I. 31 (No. 31); *Bāl.* I. 48; VII. 40. Cf. the similar tone in *Anar.* VII. 153.

l. 12. *tad varam ito*, &c. Cf. *Anar.* VII. 85/86.

l. 16. *karpūra-khaṇḍojjvalāḥ* may be dissolved either as °*khaṇḍair ujjvalāḥ* or °*khaṇḍa-vad ujjvalāḥ*; preferably the latter. Cf. *Anar.* VII. 60/61.

l. 17. *pādā* is to be understood as *pratyanta-parvatāḥ*. See *Amara.* II. 3, 7; though a pun upon the word is also likely.

gaurī-guroḥ pāvanāḥ. Repeated in *Śak.* VI. 17.

gaurī-guroḥ is repeated in *Anar.* VII. 23/24: *Bāl.* X. 31.

Page 204, l. 10. Sanskrit *chāyā*: *kaniṣṭha-tāta iti śrūyate.*

l. 12. °*rajah*°. Mark the pun upon the word, which means (1) dust; (2) pollen.

Page 205, l. 4. *tṛtīya-kāla-kriyā* refers to the prayers and rites performed in the evening, as distinct from those in the morning or at noon.

l. 7. *aho*, &c. Cf. the similar idea on p. 178, l. 14 above.

l. 16. *manye*, &c. See *Rām.* VI. 125–27.

l. 17. *iva*. The reading *iha* of the commentators, though not found in any of our MSS., is decidedly better.

Page 206, l. 2. *svena*. The syntactical position of this word is uncertain. AB. construes it with *pracalitaḥ*.

l. 5. *prakṛti-sahitaḥ*. Pick.'s translation, 'with his whole nature' is ridiculous. That *prakṛti* here means 'subjects' is evident from *sa-sainyo*, p. 205, l. 17; and from the parallel passage *samam anyābhiś ca prakṛtibhiś ca* in *Bāl.* X. 95/96.

l. 11. Sanskrit *chāyā*: *katham anyādṛśa eva dṛśyate.*

Page 207, l. 9. Sanskrit *chāyā*: *kumārau jyeṣṭhayor bhrātror abhimatau bhavatam.*

Page 208, l. 8. *kṛpārāmo rāmo.* Mark the alliteration. Pick.'s translation, 'pleasant by reason of his mercy', is not possible. *ārāma* is not an adjective here, as is evident from the context, where the author has employed all nouns like *kṣetram, khaniḥ, paripākaḥ.* Cf. *guṇārāma* in verse 41 below. See note on p. 213, l. 5.

l. 9. *pramodāt,* &c. Cf. *Anar.* I. 22/23.

l. 10. *loka-yātrā.* See note on p. 191, l. 2.

l. 12. Sanskrit *chāyā*: *ājñāpayatu kulaguruḥ.*

l. 14. Sanskrit *chāyā*: *yuṣmākam āśiṣām prabhāvaḥ.*

Page 209, l. 2. Sanskrit *chāyā*: *amba mama mandabhāginyā adhanyatayā sakalo'pi loka evaṃ kaulīnam bhaṇati yad vatsayoḥ pravāsa-jananī madhyama-jananī mantharāmukhe āsīt | tat kathaṃ vatsayor mayā mukham prekṣitavyam.*

l. 7. *tadaivāntareṇa,* &c. Cf. *Anar.* VI. 20/21.

l. 8. Sanskrit *chāyā*: *katham iva.*

l. 11. Sanskrit *chāyā*: *aho rākṣasāṇāṃ duṣṭatābhiyogo yo gṛha-sthitam abalā-janam api bādhate.*

Page 210, l. 5. *indukāntopala.* Cf. *Māl.* I. 27; *Utt.* VI. 12; *Śiśu.* IV. 58. *Śṛṅgāra-śataka* 21.

l. 12. *iṣṭair,* &c. Cf. *Śak.* V. 13/14.

l. 14. Sanskrit *chāyā*: *yad vayaṃ cintayāmas tad yuṣmākam bhavatu.* Cf. *Śak.* IV. 19/20.

l. 17. *vīra-prasavinī bhava.* Cf. *Śak.* IV. 4/5; *Utt.* I. 9/10.

Page 211, l. 5. Sanskrit *chāyā*: *jāte kula-pratiṣṭhāpaka-dāraka-prasavinī bhava.*

l. 11. *pravartantām . . . vidhau.* I have here followed the reading of W. and Sc., though in it the verb-form does not harmonize with the imperative, second person plural, of the two following lines. The reading *pravartyantām . . . vidhiḥ* of K. is grammatically defective; while the grammatically correct *pravartyatāṃ . . . vidhiḥ* of E. is metrically impossible.

l. 4. *Verse 38.* See l. 13 above.

Page 212. l. 6. *kṣātram.* &c. Cf. *Anar.* I. 22.

l. 14. *nṛtyantu.* The MSS. read *nṛtyanti.* I have emended the reading to bring it into harmony with the other verbal forms in the verse.

Page 213, l. 5. *guṇārāma.* Cf. *guṇa-drumārāmo* in *Bāl.* IX. 13; and *guṇārāma* in *Pras.*, p. 2, l. 17.

l. 11. *visṛjyetām,* &c. See *Rām.* VI. 128.

l. 12. *puṣpakam,* &c. See *Rām.* VI. 127. Cf. *Anar.* VII. 150; *Bāl.* X. 103.

l. 15. *nirvyūḍhaṃ guru-śāsanam.* Cf. the close parallel *Anar.* VII. 151; *Pras.* p. 157, l. 4.

l. 16. *cikitsita°,* &c. Cf. VI. 28 above; *Anar.* VII. 151.

Page 214, l. 2. *bharata-vākyam* is the designation of the last verse or verses in a drama, which embody a benediction.

l. 4. *īti* means 'a calamity of the season'. They are usually said to be six: (1) excessive rain; (2) drought; (3) locusts; (4) rats; (5) parrots; and

(6) foreign invasions. Cf. the definition: *ativṛṣṭir anāvṛṣṭiḥ śalabhā mūṣakā śukāḥ | pratyāsannāś ca rājānaḥ ṣaḍ ete ītayaḥ smṛtāḥ.* Some read for the second line of this definition: *sva-cakraṃ para-cakraṃ ca saptaitā ītayaḥ smṛtāḥ,* making the total number seven. Cf. *Ragh.* I. 63; *Mālavikāgnimitra* V. 20.

l. 5. *vidadhatu kavayaḥ,* &c. Cf. the close parallel *Anar.* VII. 152.

āpta-prasādam: *prasāda* is one of the *kāvya-guṇas.* For its definition see note on *prasanna,* p. 1, l. 14.

l. 6. *saṅkhyāvanto,* &c. Cf. the close parallel *Anar.* VII. 152.

bhūmnā may be construed either with *sampradhārya* or with *mudam prayāntu.* Paraphrase: *saṅkhyāvanto'pi parakṛtiṣu bhūmnā sampradhārya mudam prayāntu.* Pick.'s rendering: 'may the learned go forth and teach men to delight in the compositions of others' is not possible.

°kṛtiṣu: *kṛti,* literally, 'a work or deed', means here 'a literary work or composition'.

PART IV

APPENDIX A

After giving in full the text of V. 46, as given on p. 143 of Part II, K notes: एतावद् भवभूतेः। अग्रे कविनायकविनायकभट्टैरपूरि॥; whereafter it adds a different text for the last few syllables of the third foot and for the whole of the fourth foot (V. 46):

. . . . नाविदितं
किन्तु क्रूरतयानया स्फुटतरं क्रव्यादसख्यं मया ॥४६॥[1]

It then proceeds:

[1a] सानुशयम्। अहह।

मार्तण्डान्वयमण्डलैकतिलके बालेऽप्यचिन्त्यस्फुर-
ल्लोकातीतगुणप्रथिम्नि किमपि प्रव्यक्तशौर्याकृतौ।
धर्मत्रातरि दुर्मदान्तकरणे पापं व्यवस्य कथं
पापः सम्प्रति विप्रतीपचरितः स्यामिष्टसिद्धेःपदम् ॥४७॥[2]

सविमर्शम्[3] तदनेन प्रबन्धेनासन्मैत्रीमहीरुहः फलेग्रहिरिति मन्ये। गीतं च पुराविद्भिः।

विद्वेषादपि सद्भिर्न वरं दुष्टैस्सह प्रीतिः।
चन्दनवृक्षच्छेदादपि विषवृक्षस्य लालना विषमा ॥४८॥[4]

सस्फुरणौत्सुक्यम्। रामं निर्वर्ण्य। अहो वीराङ्कुरस्यान्यैव मुद्रा। तथा हि।

दृढा मुष्टिः सज्जीकरणविकरालेऽपि धनुषि
स्थिरा दृष्टिर्दुश्चेष्टितचपलवर्ष्मण्यपि मयि।
करष्टङ्कारातिप्रगुणगुणसंस्कारचतुरः
प्रसन्नो विश्वास्यः सुखयति तथाप्येष महिमा ॥४९॥[5]

---

[1] According to K, No. ४७. I have, however, corrected these numbers to bring them into uniformity with those in the rest of the text. So I have also corrected the spellings, with the same object in view. I have, however, purposely refrained from any emendations till after the revision of the collations of the MS. B, which was sent back to India without my knowledge.

[1a] Continuation of Vālī's speech.

[2] ४८ K.

[3] ०मर्षम् K.

[4] ४९ K.

[5] No. ५० K.

तन्न सम्भाव्यते किल क्षत्रतूवरमात्रे तावदेतावान् महिम्नः प्रकर्षः । सस्मरणम् । कथमहो गृहीतोऽस्मि चिरस्य प्रत्यभिज्ञया यत् किल रक्षःकुलोत्पातधूमकेतुराविर्भविष्यति दशरथदारेषु सप्तमो वैकुण्ठावतार इत्यार्षी व्याहृतिः श्रुतिपथमवतीर्णेव । स एवैष इति चरितान्येवास्य प्रत्याययन्ति । तथा हि ।

सुरक्ष्माभृत्सारं त्रिपुरहरधन्वाच्छिनदयं
शिशुः क्षत्रोच्छित्तिप्रथितमपि जिग्ये भृगुपतिम् ।
त्रिमूर्धप्रष्ठांश्च प्रधनभुवि नक्तञ्चरभटान्
क्षणेन प्रामृक्षज्जठरकरटाहानिव[1] करी ॥५०॥[2]

विमृश्यमाने[3] तु मैत्र्यमिदमुपकाराय । यतः ।

अगाधगाम्भीर्यमतिप्रसन्नं
निरस्ततेजोऽन्तरचाकचिक्यम् ।
[4]यमिन्द्रियाणां सुहितत्वहेतुर्
महः पुरस्तादिदमाविरास्ते ॥५१॥[5]

आकाशे । भो भो रावण मम तावदनेन तीर्थेन मित्रार्थे प्राणान् परित्यक्ष्यतः करस्थमेव श्रेयः । तव तु दुश्चरितमहिमा किंपरीपाकः । यस्य ते

साक्षाद्विश्वसृजः सुतो जनयिता देवोऽपि जेता पुरां
ध्येयं दैवतमात्मनैव शिरसामुत्कर्तनं साहसम् ।
छन्दःशिक्षकरं श्रुतं किमपरं शच्याः पतिः किङ्कर-
स्तस्यायं कुपथः स्मृतोऽपि सहसा हृन्मर्म भिन्ते मम ॥५२॥[6]

अथवा निर्वाणकालः किल त्वत्तेजसः । सविषादम् ।

वसिष्ठ[7]वार्ताश्रवणप्रसङ्गाद्
यदृच्छया श्रोत्रपथं प्रविष्टः ।
दिव्यर्षिगोष्ठ्यां किल तिष्ठमानः
सन्तप्यते त्वच्चरितैः पुलस्त्यः ॥५३॥[8]

नेपथ्ये । भो भो रामभद्र ।

धर्मत्राणाय पापीयःपरिपेषाय केवलम् ।
भवादृशामुद्भवोऽयमिति तत्त्वविदो जगुः ॥५४॥[9]

---

1 प्रामत्रज्ज° K.
2 No. ५१ K.
3 विमृष्य° K.
4 यमे° K.
5 No. ५२ K.
6 No. ५३ K.
7 K reads वशि°.
8 No. ५४ K.
9 No. ५५ K.

अतः ।

पापः पित्र्यस्यापि राज्योऽपहर्ता
सोदर्यणां स्वस्य भार्याभिकश्च ।
रक्षोमित्रं व्यथनार्थं विधित्सुः
पूर्णच्छद्मोपेक्ष्यते किं कपीन्द्रः ॥५५॥[1]

वाली सोत्प्रासम्। कथमेते सुग्रीवपक्षपातिनः शाखामृगाः प्रतिभिद्यमानाः प्रशासितारं प्रोत्साहयन्ति रामभद्रम्। ससरणावलेपम्।

भर्तुस्ताण्डवडम्बरे विषमितावस्थानमद्रीश्वरं
द्राक् काम्यं नयतोः क्षणं तुलयतोः क्ष्मांतत्प्रसङ्गात् पुनः ।
संस्कारं शतकोटिकुट्टनशतः पित्रासुकृत्ता तयोर्
बाह्वोरेष हि शासिता किमपरं त्वस्मादपि श्रोष्यते ॥५६॥

विकटं परिक्रामति ॥

लक्ष्म०। आर्ये कस्तावदाखण्डलेः खण्डनेनाभीष्टं मन्यते ॥

श्रम०। एतस्यैतन्मित्रस्य च दायादौ सुग्रीवविभीषणौ ॥

लक्ष्म०। विलोक्य। कथं चरणस्पृष्ट इव मर्मणि क्रुध्यति प्रायः पौरन्दरिः ॥

श्रम०। वत्स सुप्रसिद्धमेवैतत् यत् तेजस्तेजोऽन्तरोत्कर्षदर्शनेन दीप्यति ॥

रामः।

अयं वीरो वारामधिपतिषु सन्ध्याव्रतविधिं
विधित्सुर्यद्रक्षःपतिमभृत कक्षान्तरचरम्।
अपूर्वोऽयं दृप्यद्रिपुदलनभङ्गीप्रकटन-
प्रहृष्यद्दोर्दण्डप्रथितमहिमा गर्वगरिमा ॥५७॥

सवितर्कम्। निरूपाधिकः किलास्मिन् प्रतीकारः।

अयं दृप्तः किं नः परिगतमयं द्रुह्यति परं
सकुल्यो [2] नैतत् प्रभवति निदानं विश्वसने
अयं रक्षोमित्रं भवतु किमनेनाधमधिकं
सुदुर्वृत्तो दंह्यस्तदपि परतन्त्रस्मरणतः ॥५८॥

सविमर्शम्[3]। इदं किल क्षत्रधर्मतत्त्वं यदाहूतः सङ्ग्रामोत्सवान्न विरमेदिति। एवं च हते स रक्षःपतिर्मित्रव्यसनादुत्साहशक्त्या हीयते। हीनोत्साहस्य रिपोः प्रभुमन्त्रशक्ती अपि प्रागिव न प्रभू भवतः ॥

लक्ष्म०। यदि म्रियते ॥

---

[1] No number, K. [2] Lacuna, K. [3] °मर्षम् K.

रामः । तदा अतुलभुजबलप्रथितोपक्रमे दृप्ते तन्मित्रेऽ
स्मिन्नन्तरायकारिणि कार्यसिद्धिर्नौ नातिनिरपाया ।
अतोऽत्र किञ्चिदुभयलोकाविरुद्धं प्रतिविधातव्यम् ॥

वाली । सदृष्टिक्षेपम् ।

एतावुभावपि निपीड्य दृढं भुजाभ्यां
रक्षःप्रभोरुपहरामि परासुकल्पौ ।

अथवा किमनेन ।

उत्पाट्य सत्वरममुं गिरिमृष्यमूकं
[1] तैर्दुर्मनोरथपरैः सह चूर्णयामि ॥ ५९ ॥

इति विकटमुत्पतति ॥

श्रम० । सावेगम् । वत्सौ समवधत्तम् । कुहनाध्वपथिकस्य दशकन्धरस्य मित्रं किल दुरात्मा साङ्क्रन्दनिः ॥

लक्ष्म० । ससम्भ्रमम् । आर्य अयमनार्यमिव किञ्चिद् व्यवस्यति । तदत्र प्राप्तकालमादिशत्वार्यः ॥

रामः । शरसन्धानं नाटयित्वा । वत्स पश्य ।

शाखामृगो निरुपधिप्रतिपाद्यचेताः
सम्भ्रामकास्त्रवशमेत्य मुधैव दृप्तः ।
आकल्पमेष शरपञ्जरमध्यवर्ती
क्रीडाकपित्वमधिगच्छति दिग्वधूनाम् ॥ ६० ॥

इति विसृजति ॥

नेपथ्ये ।

यदा वीरस्तीक्ष्णैरिषुभिरभिनद्धः प्रविवशः
स्वमात्मानं तस्मात् परिहरयितुं नाशकदयम् ।

सर्वे । समाकर्ण्य । सौत्सुक्यम् । तदा किम् ॥

पुनर्नेपथ्ये ।

तदा ग्लानेर्मुक्तो रघुपतितिरस्कारवृजिन-
च्छेदे प्रायश्चित्तं व्यधित किल देहान्तमुचितम् ॥ ६१ ॥

श्रम० । दिष्ट्या प्रतिहतममङ्गलम् ॥

लक्ष्म० । नूनमुचितज्ञानामग्रणीः किल कपिग्रामणीः ॥

रामः । कथमेवं वृत्तम् । भवतु । विधिविलसितं को वान्यथयेत । [2] ऊर्ध्वमवलोक्य । किमेतदकाण्ड एव कल्पान्तक्षुभितजलनिधिहलहलिततुलितकिलकिलाकोलाहलं कपिचक्रमक्रममितोऽभिमुखमालोक्यते ॥

---

[1] Here begins MS. B.

[2] K here adds रामः.

श्रम॰। देव अयमसौ कथं कथमपि जाम्बवता प्रतिबोध्यमानं प्रत्यग्रपितृवियोगविह्वलं वत्समङ्गदं पुरस्कृत्य हनुमद्विभीषणाभ्यामनुगम्यमानः कतिपयप्रधानव्यक्तिपरिवृतः कनिष्ठः कपिराजो देवं सभाजयितुमभ्येति ॥

लक्ष्म॰। सकौतुकम्। आर्ये विविच्याधिगन्तुमीहे ॥

श्रम॰।

वीरः सोऽयं सुपर्वक्षितिभृदिव समुत्तप्तकार्तस्वरश्रीः
सौरिर्वामे पिशङ्गस्फुरिततनुरुहो धूमिलाक्षो हनूमान्।
पार्श्वेऽप्यत्र[1]ाञ्जनक्ष्मापतिरिव शनकैः सञ्चरिष्णुः कनीयान्
रक्षोनाथः प्लवगपरिवृढाः पृष्ठतोऽमी नलाद्याः ॥ ६२॥

ततः प्रविशति हनूमद्विभीषणाभ्यामनुगम्यमानः
सपरिवारः सुग्रीवो जाम्बवत्प्रतिबोधितोऽङ्गदश्च ॥

सर्वे। सप्रणामम्। जयति जयति देवो रामभद्रः ॥

रामः[2]। भद्रा इत्थं साक्षात्कृतव्यलीकः किमनुयुञ्जे ॥

सुग्रीवो जाम्बवतो मुखमीक्षते ॥

जाम्ब॰। देव दाशरथे किं प्राकृतमिव सुग्रीवं बोधयसि। स्वस्वपाप्मानुरूपां फलपरिणतिमश्नुवते किल जन्मभाजः।

[3]सुग्रीवः। सव्यलीकम्।

भवान् धर्मो धर्मप्रवणमतिरेष प्रतिदिनं
भवान् ध्येयो ध्याता पुनरयमनावर्जितमनाः।
भवान् शास्ता शिष्यः पुनरयमतन्द्रः किमपरं
भवान् सेव्यः सर्वैरुपधिभिरयं सेवक इति ॥ ६३॥

दण्डवदेनं प्रणिपातयति ॥

रामः। ससम्भ्रममुत्थाप्य परिष्वज्य च। सखे वैकर्तन। एक एव नौ प्रधानपुरुषः प्रसविता सविता। तत् किमुपचारैः ॥

सुग्री॰। देव यद्यहमनुग्रहपात्रं तदङ्गदस्य प्लवङ्गाधिपत्यदानेन मामनुगृह्णातु भवान् ॥

रामः। विहस्य। किमत्रानुग्राह्यम्।

अयं वत्सो गुणैः श्लाघ्यः पितृभक्तिपरायणः।
वत्सलश्च भवानस्मिन् किं विधेयमिहाधिकम् ॥ ६४॥[4]

सर्वे। साधु सुग्रीव साधु ॥

---

[1] K reads पार्श्वेत्यत्रा°.

[2] रामः om. K.

[3] K reads रामः for सुग्रीवः.

[4] K om. this number.

अम० । विभीषणं निर्दिश्य ।

सोऽयं भवत्पदाम्भोजमकरन्दार्द्रमानसः ।
विभीषणो दृष्टिपातप्रसादार्थी प्रतीच्छति ॥ ६५ ॥

रामः । एहि लङ्केश्वर नातिरिच्यते किल भवान् वत्सलक्षणात् ॥

इति पार्श्वे समुपवेशयति ॥

हनूमान् । ससम्भ्रममुपसृत्य । रामदेव ।

ललाटतटसंश्लिष्टचरणाभ्यर्णभूतलः ।
कैङ्कर्याधिकृतिं लिप्सुर्हनूमान् प्रणमत्ययम् ॥ ६६ ॥

रामः । बाहू प्रसार्य । सानन्दबाष्पगद्गदम् । एह्येहि ।

उक्तसृष्टिर्भवन्मूला भक्तचर्योत्सुकोऽप्यहम् ॥
आञ्जनेय महाबाहो तन्मामालिङ्ग मा चिरम् ॥ ६७ ॥

तथा कृत्वा सर्वाङ्गस्पर्शं रूपयति ॥

हनूमान् सव्रीडं तिष्ठति ॥

रामः । निरूप्य । सचमत्कारम् । सखे हनूमन् ।

किमेतदतिसंस्तवाद्विषयमागतः सङ्ग्रहं
निवर्तयति मे दृशः किमपि चित्तमाकर्षति ।
मतिं विवशयत्ययं जडयति स्फुटं चेतनां
विमन्यदपहन्त्यहह वस्तुमात्रादरम् । ६८ ॥

हनूमान् वैचित्यं नाटयति ॥

अम० । सावेगमुपसृत्य । देव तदिदं यन्मया प्रागावेदितं सीतादेव्याः संव्यानमनसूयानामाङ्कम् ॥ इति दर्शयति ॥

रामः । ससम्भ्रमौ हस्तौ प्रसार्य गृहीत्वा निर्वर्ण्य । सबाष्पम् । हा प्रिये वैदेहि ॥ संवृणोति ॥

पुनर्विभाव्य किञ्चिदथ दृष्ट्वा । अहो विधेः क्रूरता । यतः ।

तथा सा हारिता कान्ता यथा वार्तापि दुर्लभा ।
रुन्धे च तदभिज्ञानवीक्षोत्कामश्रुभिर्दृशम् ॥ ६९ ॥

इति ध्यानं नाटयति ॥

अम० । अहो दुरुच्छेदः किल स्नेहपाशः यस्तावदेवंविधानचिन्त्यमहिमानो महात्मनोऽपि विधेयीकरोति । तथा ह्ययं देवः ।

परिमुकुलितचक्षुः सान्द्ररोमाञ्चवर्मा
विषयकरणवृत्त्या निर्भरं पर्यपास्तः ।
किमपि कलितकान्तं स्वान्तमानन्दहेतो-
रुपधिभिरपि बाह्यैः सम्भ्रमं नः करोति ॥ ७० ॥

रामः । स्वगतम् । अहो किमेतदवस्थाविशेषोऽन्यथैव किञ्चिदनुभावयति । तथा हि ।

निवृत्तिः प्रत्येकं भवति करणानां स्वविषया
तथा सर्वाण्यच स्मृतिजनकतामेव दधति ।
अतस्मिंस्तद्भावं भजति जगन्नैवमिति चेत्
कथङ्कारं सर्वं परिणमति कान्तामयमिदम् ॥ ७१ ॥

लक्ष्म० । अचिन्त्यः किलायं मोहमहिमा यस्तावदार्यमपि विषयीकरोति । तत् किमत्र प्रतिविधेयम् ॥

रामः । संस्तभ्यात्मानं चक्षुरुन्मील्य निरूप्य च । सखे हनूमन् किमेवमतिदुर्मनायसे ॥

हनू० । दिनकरकुलमणे भवत्प्रसादासादितकपिसाम्राज्यो वत्साङ्गदानुगतः सुग्रीवो मन्मुखेन भवन्तं विज्ञापयति ।

वयं धन्याः सर्वे रघुपतिवृषा यान् स्मितसुधा-
च्छितेनालोकेनाप्यथ समनुगृह्णाति वचसा ।
अनूद्यैतत् सर्वं पतति मम चेतस्त्विति विधौ
निदेशालङ्कारं पुनरवनते मूर्ध्नि बिभृयाम् ॥ ७२ ॥

रामः । सदृशं हि नामैतत् । भवादृशं सुहृदमपास्य केन वान्येनैतदनुयोक्तव्यं । कस्य वान्यस्यात्राधिकारः । किन्तु प्रथमदर्शनं प्रियसुहृद इत्यनुरुध्ये ॥

जाम्ब० । यदभिरुचितं प्रभविष्णवे । ऊर्ध्वमवलोक्य । सम्प्रति तु ललाटन्तपस्तपति तिग्मांशुः नखम्पचश्च पन्थाः । तथा हि ।

नभः शून्यं भूम्ना प्रसभमति[1]तापव्यतिकरे
कुलायान्ते विश्राम्यति [2]गिति वृन्दे छदभृताम् ।
भुवोऽप्येता दूरं विरलविटपिच्छाधरदरी-
[3]झरीतीरे स्वापं दधति निकुरम्बेऽपि पृषताम् ॥ ७३ ॥
तत् किमत्र प्राप्तकालमित्याज्ञापयतु देवः ॥

रामः । इदमेव । किमन्यत् । यद् यूयं सार्धमेव प्रियसुहृदा लङ्केश्वरेण समुचिता याहःकृत्यायतन्तां अहमपीह मतङ्गाश्रमपद एव श्रमणानिर्दिष्टपरिसरेषु वत्सहनूमद्भ्यां सह समयमनुमतिवाहयामि ॥

इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

॥ पञ्चमोऽङ्कः ॥

---

[1] K reads °मनिनाप°. [2] K has a lacuna [3] K has a lacuna for झ.

APPENDIX B

After V. 46 the Mysore MS. (hereafter called Mr) has a text which differs entirely both from the original and from the Kāśmīr MS. (called K). This new text corresponds with the one to be found in the edition of the play edited by Ratnam Aiyer[1] (hereafter called A), Bombay, 1901. I have collated Mr with the printed text, the *variae lectiones* of which I have given in foot-notes.

The MS. reads:

[1a] अवश्यं च श्रेयस्विना[2] भवितव्यम् ।

यशःसन्तानो मे विशदशरदिन्दुद्युतिनिभ-
प्रकाशो विश्वान्तर्विलसति दिगन्ते विस्मरः ।
त्रयाणां लोकानामधिपतिरजय्यो जनयिता
ततः श्रेयोमूलं सुजनचरितं मेऽभिरुचितम् ॥ ४७ ॥[3]

अनतिक्रमणीयं च सुहृत्कार्यम्[4] । तदेवमुभयतःपाशेन रज्ज्वा बद्धः सम्प्रमुग्धोऽस्मि[5] । [6]इति सविचारं परिक्राम्य रामं [7]दृष्ट्वा । अहो अचिन्त्याद्भुतमहिमानुभावमप्रतिहतानन्द[8]शक्तिकमप्राकृतमिदं किमपि ज्योतिः । अपि च । मन्ये पौराणिकेष्वप्रसर्गं[9] प्रकरणेषु प्रख्याताः[10] । सत्यमेतद्वै[11] खल्वेतस्यैव तेजोलेशविलासरूपाणि नान्यस्य ।

अत्युग्रोदग्रवेल्लद्गगधगितजगद्दाहरौद्राधिकार-[12]
क्रीडत्कल्पान्तकालज्वलनविलसदुद्दण्डचण्डायितानि[13] ।
संवर्तारम्भसर्वप्लवनयनमहाविग्रहव्यग्रधर्म्य-[14]
प्राग्भारोदारघोरस्खलदुरुमिहिरज्योतिरुज्जृम्भितानि[15][16] ॥ ४८ ॥

---

[1] See 'Bibliography'.

[1a] Continuation of Vālī's speech.

[2] A adds मया.

[3] Mr does not number verses.

[4] सुहृद्वाक्यम् A.

[5] सम्मुग्धो A.

[6] इति om. A.

[7] अवलोक्य for दृष्ट्वा A.

[8] °नन्त° for °नन्द° A.

[9] °केषु प्रसङ्गप्रकरणेषु A.

[10] प्रख्यातम् A.

[11] सत्यमेतस्यैव A.

[12] °वल्गद्गग° A

[13] °दुद्दाम° A.

[14] °महाव्यग्रहव्यग्रहौघ° A.

[15] °रोद्दाम° A.

[16] °ज्वलदु° A.

परदेवतां[1] प्रतिपत्तिपूर्वकं भक्तिमभिनीय।

यथायं निध्यातः स्फुरति हृदि सम्भावितपरः-
सहस्रब्रह्माण्डप्रलयपुनरुद्बोधविभवः।
तथा मन्ये नूनं जगदवनहेतोरवतरन्[2]
गतो देवः साक्षा[3]ज्जगति भुवि नारायण इति ॥४९॥

धिक् तं विनिपातहेतुभूतं [4]जगत्कार्याभिनिवेशं। यत एतादृशे महात्मनि महत् पापं कर्तुमध्यवसितम्। परित्यज्यतामिदं सौहार्दम्। नास्ति मे प्रत्यवायः। तथा हि।

अधर्मो धर्मतामेति ह्यादृते परमेश्वरे।
धर्मोऽप्यधर्म एव स्यात्तमनादृत्य भावितः ॥५०॥

पुनः सविषादम्। महावीराणां वानरेन्द्राणां राक्षसेन्द्राणां च समक्षं भाष्यवन्तं प्रति प्रतिश्रुतसङ्ग्रामस्य युद्धवैमुख्ये सति कथं ते महात्मानो मन्येरन्। चिरार्जितं च विश्वव्यापकं महद्[5] यशो लुप्येत। अय[6]शश्च लोके सर्वत्र प्रचुरं स्यात्[7]। विचिन्त्य। एवं क्रियताम्। समामवलेनैव वाली युध्यत इति [8]कदाचिदस्ति मे प्रसिद्धिः। तथैव मे प्रतिज्ञा च। सत्यप्रतिज्ञश्चाहम्। [9]वलसाम्यपरीक्षाव्याजेनासाध्यं किञ्चित् प्रत्यायनं प्रार्थ्यतां[10] रामभद्रः[11]। पुनः स[12]विमर्शम्। अहो महाप्रभावस्य रामस्यासाध्यं नाम किञ्चिदस्ति। येन दुन्दुभिदेहः पादाङ्गुष्ठेन [13]वीर्यात् परमाविद्धः। पुनर्विचिन्त्य[14]। [15]तर्हि सावज्ञं किञ्चित् प्रत्यायनं प्रार्थ्यताम्। ततः स्वावमानस्य[16] हेतुभूते प्रत्यायने रामो न प्रवर्तते[17]। तथा च नः[18] सिद्धं समीहितं सङ्ग्रामवैमुख्यम्। पुनर्विमृश्य। सविषादम्। अहो महात्मानं प्रति कथमेतादृशं वचनं वक्तुकामोऽस्मि। किमनेन प्रत्यवायस[19]ङ्कुलितेन वक्रमार्गेण। अथ[20] सङ्ग्रामनि[21]वृत्तंनि ऋजुरेव[22] मार्गो निष्कलङ्कः[23]क[24]श्चिदालोचनीयः। विचिन्त्य। सहर्षम्।

---

1 ०देवताप्रति० A.
2 ०रवतरं A.
3 ०ज्जयति A.
4 सुहृत्का० A.
5 मद् A.
6 अपयश० A.
7 किमत्र समाधानम् add. A.
8 काचि० A.
9 तथैव add. A.
10 कर्म add. A.
11 ०भद्रतः A.
12 सविषादम् A.
13 विन्ध्यात् A.
14 सावज्ञम् add. A.
15 तर्हि सावज्ञं om. A.
16 ०मानहेतु० A.
17 ०वर्तेत A.
18 A reads नः *after* सिद्धं.
19 ०संवलितेन A.
20 ततः for अथ A.
21 ०वृत्तौ for ०वृत्तं नि A.
22 ०रेष A.
23 च add. A.
24 For कश्चिदा० . . . निस्कलङ्कस्य A reads: त्यज्यतामिदमध्यवसितम्। किन्तु जगत्पूज्यो भवानतिथिरस्माकमागत इति वङ्मानपुरःसरमेव साख्यं क्रियताम्।

सान्त्वनैरभिसम्पूज्य सन्त्यज्यानुचितं वचः ।
सौजन्यसिन्धुनानेन सख्यमेव समञ्जसम् ॥ ५१ ॥

अयमेव ऋजुमार्गो निष्कलङ्कश्च । वानरा[1] राक्षसाश्च यथा तथा वा जानन्तु । पुनर्विमृश्य । सविषादम् । लोकप्रसिद्धं वालिरावणयोः सख्यं रामो जानाति । अद्यतनं च मां प्रति माल्यवतः [2]प्रार्थनं समी[3]पागतस्य रामस्य कर्णपथं गतं स्यात् । तथा च रावणसौहृदपरित्यागिनं मित्रद्रोहिणं महापापिनं मत्वा न मामङ्गीकुर्यात् । कदाचित् समये प्राप्ते रावणमिव माम[4]प्ययं परित्यजेदिति अविश्वसनीयस्य[5] बुद्धिश्च तस्य स्यात् । अतो दुर्घटं तेन सख्यम् । [6]ताटस्थ्यावलम्बने च रामस्य मयि मित्रद्रोहशङ्का तदवस्थैव । महात्मनश्च तस्यावश्यमभिनीतेन मया भवितव्यम् । का गतिः । सम्यगधिचिन्त्य । पूर्वचिन्तितं बलसाध्यपरीक्षाव्याजेन समानबलेन सम्प्रहार इति प्रतिज्ञापरिपालनधर्मः[7] येन[8] मयि रामस्य मित्रद्रोहशङ्का न स्यात् । यतः सर्वापेक्षया सत्यप्रतिज्ञता बलवती । अत[9] एव हरिश्चन्द्रादिभिः सत्यप्रति[10]ज्ञानुरोधेन चण्डालदास्यादिकमप्याचरितम् । न [11]चेदेवमवमानहेतुतया रामस्य प्रकोपहेतुः । महाप्रभावस्य[12] मादृशे[13] कियानवमानः । किञ्च महत्स्वेवापराधेषु महात्मनां प्रकोपः । अतो मादृशानां वाङ्मात्रेण कोपं न करिष्यति । तस्मात् तेनैव व्याजेन सङ्ग्रामः परिहरणीयः ।

निःसीमं[14] निरयानुबन्धि च निराकुर्यामहं[15] सौहृदं
निःशेषाश्च निशाचरा निजपदाद्भ्रश्यन्तु नश्यन्तु वा ।
मन्दो माल्यवता विमोहितमना मन्दोदरीवल्लभः
किं कुर्मो मतिविभ्रमादिह महावीरेण वैरायते ॥ ५२ ॥

अयं च रामः सम्भाषणयोग्यं[16] स्वल्पान्तरालं [17]प्राप्तः । रामं प्रति । स्वागतं महावीरस्य ॥

---

[1] वानरराक्षसाश्च A.

[2] प्रोत्साहनं A.

[3] समीपगतस्य A.

[4] मामयं A.

[5] °नीया च A.

[6] For ताटस्थ्य° . . . °परीक्षाव्याजेन (l. 11 below) A reads: तदीयहृदयदूरभूतस्यैहिकामुष्मिकप्रसङ्गो दूरत एव । अतस्तदपेक्षया सावज्ञप्रत्यायनप्रार्थनमेव गरीयः । न चास्मिन् पक्षे रामस्यानाश्वासप्रसङ्गः सुहृतकार्यविरुद्धं.

[7] इति add. A.

[8] येन मयि . . . न स्यात् om. A.

[9] तथा for अत A.

[10] °प्रतिज्ञतानु° A.

[11] °चेदवमा° A.

[12] तस्य add. A.

[13] मादृशैः A.

[14] निःसारं A.

[15] °कुर्यामिदं A.

[16] °योग्यः A.

[17] सम्प्राप्तः A.

रामः । इदानीमहं महावीरः संवृत्तः । यतो महावीरलाभेन मद्बाहुबलं साफल्य मनुभवति ॥

वाली । धिगस्तु मे महावीरता[1] येन महावीरधर्मः परित्यक्तः । स एव खलु धर्मो वीरस्य यज्जगत्पूज्यानां भवादृशां परितोषणम् ॥

रामः[2] । मद्बाहुबलसा[3]फल्यसंवादनं मम परितो[4]षणहेतुरेव ॥

वाली । मया किञ्चिद् विज्ञाप्यमस्ति । तच्च भवान् मय्य[5]नुग्रहमवधारयतु ॥

रामः । किं तत् ॥

वाली । एतावन्तं कालं समानबलेनैव मे सम्प्रहारः । अतः समानबलत्वे किं[6] तत् प्रत्यायनमनुगृह्यताम् ॥

रामः । केन[7] कर्म[8]णात्र भवतः प्रत्ययः स्यात् ॥

वाली[9] ।

वृक्षान्तर्लीनमूर्तिः प्रणिहितमनसा सम्यगालोक्य लक्ष्यं
वचस्याभोगयुक्तं मम निशितशरान्[10] मुञ्च नाथ[11] प्रहारम् ।
तच्चेद् भिद्येत दत्तप्रसरमपि भवेत् प्रव्यथितापि यद्वा
तेनाशङ्के[12] निरासे ननु तदनुमतस्तुल्यसारो मम स्यात्[13] ॥ ५३ ॥

रामः । सक्रोधम् । आ[14] दुरात्मन् वीरबन्धो तृणप्रायं मत्वा मामपहससि । अथवा क्व [15]वापहासयोग्यता । तथा[16] मन्ये सत्यं सङ्ग्रामभीरुणा त्वया प्राणपरि[17]त्राणाय कश्चिद् व्याजः परिकल्पितः । किञ्च यदि परित्यक्तसङ्ग्रामो [18]भविष्यसि । तदा त्वया मयि महान् द्रोहः प्रयुक्तः स्यात् । यत एवमपहा[19]सेऽप्युदासीनं मामसमर्थं महावीरं[20] मन्येरन् । तदा[21] च लोके महानपवादः स्यात् । निश्व[22]स्य ।

---

1 ०वीरताम् A.
2 रामः om. Mr.
3 ०फल्यं for फल्यसंवादनं A.
4 ०तोष० for ०तोषण० A.
5 ०नुग्रहबुद्ध्याव० A.
6 किञ्चित् for किं तत् A.
7 के for केन Mr.
8 कर्मणा तत्र० A.
9 वाली om. M.
10 ०शरं A.
11 गाढप्रहा० A.
12 ०शङ्कानिरा० A.
13 स्याः A.
14 हा A.
15 तवा० for वा० A.
16 तथा मन्ये सत्यं A; नेप । सयं Mr.
17 ०संरक्षणाय for ०परित्राणाय A.
18 गमिष्यसि A.
19 ०हससेऽप्यु० A.
20 ०वीराः A.
21 तथा A.
22 निःश्वस्य A.

मनोर्वंशे जाताः प्रथितयशसो भूमिपतयो
मनागप्येतेषां चरितमपवादे न पतति ।
त्रिलोकीविस्तारी[1] प्रबलपरिवादैकजनक-
[2]स्तृणीकारः कोऽयं शिव शिव मनो मे व्यथयति ॥ ५४ ॥

वाली । आत्मगतम् । हन्त महद्विपरीतम् । यदनुकूलत्वेन मया चिन्तितं तत्[3] प्रतिकूलं संवृत्तम्[4] । एतावत्पर्यन्तं युद्धे कृते देवताद्रोह इति स्थितम्[5] । इदानीं तु युद्धपरित्यागे महान्[6] द्रोह इत्यापतितम् । अहो विसंवादः । अस्मिन् परमेश्वरदृष्ट्या मम स्वात्मनि [7]परसंनिकर्षबुद्धिः स्थिता । अस्य तु मयि महावीरबुद्ध्या परमोत्कर्षबुद्धिरेव । अतो मदीयदुरुक्त्या महान्तमपराधं मन्यते । अत एव मदीयदु[8]रुक्तिश्च न वाङ्मात्रम् । प्रकाशम् । महानुभाव मयि स्वजन[9]प्रतिपत्त्या मदीय[10]दुरुक्तं क्षम्यताम् । किं प्रेक्षावन्तः परीक्षन्ते दावानले [11]शक्तिरस्ति वा[12] न वेति । तदेहि सङ्ग्रामभूमिं गच्छावः ॥

रामः । वत्स लक्ष्मण शबर्या सह सुग्रीवविभीषणौ गत्वा मद् वचनात् ब्रूहि । "भवद्दर्शनाय प्रस्थितस्य मे मध्येमार्गं वालिना समागमः सम्प्राप्तः । तदतिक्रमे च महदनौचित्यम् । [13]ततो मुहूर्तं विलम्बः सह्यताम्" इति ॥

लक्ष्मणः । यदाज्ञापयत्यार्यः ॥ इति निष्क्रान्तः ॥

रामः । धनुरास्फालयन् । सहर्षम् । हन्तेदानीमस्मदीय[14]धनुषः प्रादुर्भवति

द्रागभ्यागतनिर्भयप्रतिभटप्रागल्भ्यनिर्भेदन-
भ्राज[15]ज्जृम्भवि[16]धूतभूतनिनदप्राग्भारवान्[17] भैरवः ।
[18]उद्भूतप्रलयार्भटीपटुनटद्भूतेशभीमाद्भुत-
क्रीडानिर्भरसम्भ्रमभ्रमसमुज्जृम्भाय बभ्रारवः ॥ ५५ ॥

---

1 ॰विस्तारिप्रबल॰ A.
2 ॰स्तृणी॰ Mr ; ॰स्तृणी॰ A.
3 एव add. A.
4 ॰वृत्तः A.
5 सिद्धम् A.
6 महाद्रोह A.
7 परं निकृष्टबुद्धिः A.
8 ॰रुक्तिश्च A ; ॰रुक्तिश्च Mr.
9 ॰जनं प्रति॰ Mr ; ॰जनप्रति॰ A.
10 ॰यं दुरु॰ A.
11 दहन add. before शक्ति॰ A.
12 वा न om. A.
13 अतो A.
14 ॰दीयं धनुः प्रा॰ A.
15 ॰जज्जृम॰ A.
16 ॰विभीत॰ A.
17 ॰वद् भीरवः A.
18 A has a lacuna for the last two feet of the verse.

अपि च।

> दृप्यज्जम्भारिडिम्भप्रहरणगिरिषु स्फूर्जदुज्जृम्भिदीव्य-[1]
> दम्भोलिस्पर्धिनीभिर्गुरुषु मदिषुभिर्भीममभ्या[2]गतेषु।
> तद्वाटीमग्नभूभृद्बृहदुपलदृढाघातवि[3]ध्यण्डभङ्ग-
> स्फायज्झाङ्कारहेतुर्भवतु मम [4]भुजास्तम्भगम्भीरसारः ॥५६॥

किन्तु [5]पुनश्च पूर्वबुद्ध्या वालिनः सङ्ग्रामवैमुख्यं कदाचित् सम्भाव्यत इति पर्याकुलं मे हृदयम्। भवतु सर्वं द्रक्ष्यामः[6] ॥

इति निष्क्रान्ताः सर्वे ॥

॥ पञ्चमोऽङ्कः ॥

ततः प्रविशति सम्पातिर्नाम वानरः ॥

[7]सम्पातिः। अङ्गदेन वानरराजसूनुना प्रेषि[8]तोऽस्मि। "सम्पाते वालिनः प्लवङ्गमाधीशस्य[9] वृत्तान्तो न विज्ञायते। तदन्वेषणाय दिशि[10] प्रस्थिता[11] वानराः। त्वं च [12]ऋष्यमूकं गत्वा[13] विचारय" इति। तत्र च सुग्रीवविभीषणाभ्यां सह कृतसख्यो राम[14]भद्रस्तिष्ठति। तत्रैवायं वृत्तान्तो विदितः स्यात्। अग्रतोऽवलोक्य। अयं हनूमानित एवाभिवर्तते। यावदेनं पृच्छामि ॥

ततः प्रविशति हनूमान् ॥

[15]हनूमान्। आदिष्टोऽस्मि महात्मना राम[16]भद्रेण। "भो हनूमन्। वालिनं गवेषयितुं सुग्रीवविभीषणौ प्रस्थितौ। अहं च लक्ष्मणेन सह[17] तत्रान्वेष्टुं गच्छामि। त्वं च किष्किन्धासमीपं गत्वा विचारय" इति। क्व वाली मया द्रष्टव्यः। न केवलमिदं रामकार्यम्। यतो महाराजसुग्रीवोऽपि भ्रा[18]तुर्यशोनाशसम्भावनया भ्रातरं युद्धार्थमानेतुं समन्ताद्-

---

1 °विद्यु° for °दीव्य° A.

2 °भ्याहतेषु A.

3 °विन्ध्याण्ड° A.

4 भुजस्त° A.

5 पुनश्च om. A.

6 °क्ष्यामि A.

7 सम्पातिः om. Mr.

8 प्रेचितो Mr प्रेषितो A.

9 Mr adds युक्ता which it afterwards strikes out.

10 दिंशि add. A.

11 प्लवङ्गमाः प्रस्थापिताः for प्रस्थिता वानराः A.

12 ऋश्य° Mr ऋष्य° A.

13 गत्वा om. Mr.

14 रामस्ति° A.

15 हनूमान् om. A.

16 °चन्द्रेण for °भद्रेण A.

17 तत्र add. A.

18 भ्रातृयशो° A.

न्विष्यन्[1] [2]पर्येति। पुरोऽवलोक्य। अयं सम्पातिरित एवाभिवर्तते। एतन्मुखेन ज्ञातव्यम्। [3]उपसृत्य। सम्पाते क्व प्रस्थितोऽसि॥

सम्पा°। एवम्। इति कथयित्वा[4]। त्वं पुनः क्व प्रस्थितोऽसि॥

हनू°। एवम्। इति कथयति॥

सम्पा°। विदितं मया वेदितव्यम्॥

हनू°। मया च विज्ञातव्यं[5] विज्ञातम्। यावद् रामाय निवेदयामि। अयं[6] रामो लक्ष्मणेन सह वालिनमन्विष्यन् इत एवाभिवर्तते। यावदुपसर्पामि॥

इति निष्क्रान्तौ।

॥ शुद्धविष्कम्भः॥

ततः प्रविशत्यधिज्यधन्वा वालिगवेषणव्यग्रो रामो लक्ष्मणश्च॥

रामः। हन्त किमेतत्। न जाने क्व गतो वाली वानरेन्द्रः। पूर्वेद्युरहं वालिना[7] सह[8] सङ्ग्रामभूमिमभिप्रस्थितः[9]। स च मद्विषयाद्बहुमानान्मां प्रत्युपचारार्थं पुरोगमनं पार्श्वगमनं च परिहृत्य परिवारं च किष्किन्धां सम्प्रेष्य[10] एकाकी पूर्वत एव मामनुगतः। अहं चाप्रतिच्छन्नेव[11] सङ्ग्रामभूमिपर्यन्तमागतः। [12]अद्यावश्यं द्रष्टव्यः। पुरोऽवलोक्य। सहर्षम्। अयमसौ वाली॥ सत्वरं धनुषि[13] वाणं सन्धत्ते[14]॥ वाली वा सुग्रीवो वा[15] [16]विभीषणो न[17] दृश्यते। अनुचराश्च न दृश्यन्ते। तस्मादयं वालीति निश्चिनोमि। पूर्वेद्युश्चैकाकी स्थितः॥

---

1 °न्विष्य Mr °न्विष्यन् A.

2 पर्यटति A.

3 उपसृत्य om. Mr.

4 कथयति A.

5 विदितं विज्ञातव्यं for विज्ञातव्यं विज्ञातं A.

6 च add. A.

7 वाली च for वालिना A.

8 एव add. A.

9 °प्रस्थितौ A.

10 सम्प्रेच्य Mr सम्प्रेष्य A.

11 चाप्रतीच्छन्नेव A.

12 For अद्यावश्यं . . . दृश्यते A reads: तत्र युद्धारम्भाय पृष्ठतः समालोकितो न दृष्टः। आश्चर्यम्। ततस्तं बहुशोऽन्विष्यापि क्वाप्यपश्यन् नैराश्येनर्ष्यमूकमहमागतः.

13 धनुषि *after* वाणं add. A.

14 लक्ष्मणः। मम तु संशयो वर्तते add. A.

15 इति add. A.

16 रामः add. A.

17 नु Mr न A.

प्रविश्य [1]हनूमान्। सुग्रीवोऽयम्। न हन्तव्यो न हन्तव्यः॥

रामः। आः[2] [3]आकृतिसाम्यादनर्थहेतुर्विपर्ययः॥

ततः प्रविशति सुग्रीवः॥

सुग्रीवः[4]। न दृष्टो वाली॥

रामः। सखे सुग्रीव विभीषणः क्व गतः। अनुचराश्च[5] क्व गताः॥

सुग्री०। एकत एवान्वेषणे [6]वाली न दृश्यत इति नानामुखा वयं प्रस्थिताः॥

ततः प्रविशति विभीषणः॥

विभीषणः[7]। न दृष्टो वाली॥

हनू०। स्वामिन् वालिनो दर्शनमस्माकं[8] कुतः। यतस्तदीया अपि वानरास्तत्र तत्रान्विष्यन्तो न पश्यन्ति॥

रामः। तर्हि [9]ऋष्यमूकं गमिष्यामः। किन्त्वमोघस्य बाणस्य किञ्चिल्लक्ष्यं प्रदर्शनीयम्। निरपराधेषु च न प्रयोक्तव्यः। किं करोमि। पुरोऽवलोक्य। अयमितो नातिदूरे [10]वृक्षखण्डे कश्चिन् नागः[11] सञ्चरति। अयमेव [12]लक्ष्यीकर्तव्यः। मृगया च राज्ञां धर्म एव। सावधानेन मया[13] भवितव्यम्। यतो मृगजातिर्धनुर्धरं दृष्ट्वा पलायते। अतो वृक्षविटपान्तरित एव[14] भूत्वा [15]निहनिष्याम्येनम्॥ [16]निष्क्रान्तो रामः॥

सुग्रीवविभीषणौ। अहो वाली क्व[17] गतः स्यात्। परस्परं विमृशतः॥

प्रविश्य सम्भ्रान्तो रामः। हन्त महद् वैशसमापतितम्[18]।

मया बाणेन तीक्ष्णेन मृगो हृदि विदारितः।
अद्रिराजप्रमाणेन वालिरूपधरो मृतः[19]॥१॥

[20]अग्रतोऽवलोक्य गत्वा विचारयामि॥

ततः[21] प्रविशति दिव्यपुरुषः॥

---

1 हनु० Mr हनू० A.
2 आः om. A.
3 आकृति० A सुकृति० Mr.
4 सुग्रीवः om. Mr.
5 ०चरा वा A.
6 स for वाली A.
7 विभीषणः om. Mr.
8 दर्शनं दुर्लभमस्माकम् for दर्शनमस्माकं कुतः A.
9 ऋश्य० Mr ऋष्य० A.
10 ०षण्डे Mr ०खण्डे A.
11 मृगः A.
12 लक्ष्यी० A.
13 मया om. A.
14 एव om. A.
15 हनि० for निहनि० A.
16 इति add. A.
17 A reads क्व *before* वाली.
18 ०मापादितम् A.
19 मृगः A.
20 तदग्रतो for अग्रतोऽवलोक्य A.
21 प्रविश्य for ततः प्रविशति A.

दिव्यपुरुषः[1] । विजयीभव रामचन्द्र[2] ।

मुनिर्वा देवो वा भवतु ननु जम्भारिरपि वा
विधाता भूतानामपि भवतु यद्वा कमलभूः ।
तथा देहस्यान्ते स्वयमनुगृहीतस्य भवता
ममाग्रे कस्तेषां प्रभवति महिम्नामतिशयः ॥ २ ॥

रामः ।

कस्त्वं मया न विज्ञातः स्तौषि मां परया मुदा ।
कुतूहलेन सङ्क्रान्त[3]मतस्त्वं प्रसीद[4]तु ॥ ३ ॥

दिव्यपुरुषः । अहं किल

वसुन्धराधीश महाबलानां वाली विनेता [5]वरवानराणाम् ।
मदान्धभावेन मयाभिपन्नो मतङ्गशापेन कुरङ्गभावः ॥ ४ ॥

पुरा किल मदोन्मत्ततया मतङ्गमुनौ मर्यादाम[6]नवेक्ष्य तदीयाश्रमपरिसरे दुन्दुभिदेहं[7] विक्षिप्तवान् । तद्रुधिरपर्युक्षितं निजाश्रमाङ्गणं दृष्ट्वा स मुनिः शशाप । "दुरात्मन् वीरदर्पेण खल्वेवमकार्षीः । अनेनातिक्र[8]मणेन [9]देहस्यान्ते कुरङ्गरूपं लब्ध्वा वीरधर्मविरुद्धं कुत्सितं मरणं प्राप्स्यसि" इति । ततो मया मुनिर्बहुशः प्रयत्नैरनुनीतः पुनरनुजग्राह ।

वेदान्तजालपरिशीलनलब्धवर्णो
वेदान्तरायविकलोऽयमनन्यभावः ।
देवासुरैरपि दुरूहतमेन तेन
देहान्तमन्यदुरवापमवाप्स्यसीति ॥ ५ ॥

स एवायं शापो यदहं सङ्ग्रामभूमिं प्रति त्वामनुगच्छन्नन्तरा मृगो भूत्वा स्वरूपं च विस्मृत्य पलायितः । स एवायमनुग्रहो यत्तव प्रसादाद् ब्रह्मादीनामप्यलभ्यमैश्वर्यमवाप्तवानस्मि । तदेव भव[10]दनुग्रहबलादुपनतं शाश्वतं पदं गमिष्यामि ॥

रामः । तथास्तु ॥ [11]इति निष्क्रान्तो दिव्यपुरुषः ॥

रामः[12] । वत्स लक्ष्मण विभीषणेन सह किष्किन्धां गत्वा वालिनः कृतोत्तरक्रियं सुग्रीवं वानरराज्येऽभिषिच्य कतिपयदिनैरेव[13] मत्सकाशमागच्छ । विभीषणस्तु भ्रातृव्य-

---

[1] दिव्यपुरुषः om. Mr, A.
[2] विजयीभव A.
[3] °मन्त° A.
[4] °दति A.
[5] वन° A.
[6] °मनपेक्ष्य A.
[7] अहं add. A
[8] °क्रमेण A.
[9] देहस्यान्ते . . . भूत्वा स्वरू° (l. 20 below) om. Mr.
[10] °नुग्रहतो मामुपनतं A.
[11] इति om. A.
[12] रामः om. Mr.
[13] दिवसैरेव A.

समकर्शितस्य सुग्रीवस्य समाश्वासनाय तत्रैवास्ताम्। अहं तु सुग्रीवभृत्यैः[1] कतिपयैर्वानरैः परिचर्यमाण [2]ऋष्यमूके वत्स्यामि। मया [3]खल्वयोध्यायां प्रतिज्ञातं चतुर्दश वर्षाणि नगरप्रवेशं न करिष्यामीति वृष्टिकाले मासचतुष्टये व्यतीते वङ्ग [4]कार्यमभिवर्तनीयम्॥

लक्ष्मणः। यदाज्ञापयत्यार्यः। सुग्रीवस्य [5]राज्यानन्तरमेव [6]त्वत्समीपमागमिष्यामि[7]। तावत्पर्यन्तमिमे [8]वानराः परिचरन्तु। सीतावियोगदुःखितस्य तव समाश्वासनाय [9]ऋष्यमूकगुहायामवस्थापितं [10]सीताभरणमर्पयिष्यामि। पूर्वेद्युस्त्वदागमनसम्भ्रमेण त्वदुपचार[11]व्यावृत्तैरेतैः त्वया च सुहृत्समा[12]गमनसन्तोषातिशयेन तत्कथालापविनोदव्यग्रतया च विस्मृतं तत्[13]॥

निष्क्रान्ता लक्ष्मणादयः॥

रामः। परिक्रम्यावलोक्य च। अयमसा[14]वृष्यमूकः। आरोहणं नाटयित्वोपविश्य।

[15]अहं तावत् छात्त्वं निशिचरपतेः पौरुषवलं
हठाक्रान्ते मित्रे प्लवगकुलमुख्ये विनिहते।
[16]कदा भस्मीकुर्यामहमहह[17] लङ्कामविकलं
कदापि[17a] क्रव्याद्भ्यः [18]जगति --[19] नष्टा मम रुषा॥ ६॥

मायामात्रमितः परं तस्य वलम्[20] तत्प्रतीकाराय कश्चिदुपायश्चिन्तनीयः। पुरोऽवलोक्य[21]। किं[22] अद्भुतं ज्योतिरितोमुखमभिवर्तते। सम्यग् विलोक्य[23]। अहो भगवानगस्त्यः सम्प्राप्तः॥

ततः प्रविशत्यगस्त्यः॥

अगस्त्यः[24]। अद्यैवास्मत्सुहृदा विश्वामित्रेण सन्दिष्टम्।

"यन्मयाधिष्ठितं यत्नाद् यातुधानवधादिकम्।
जगन्मङ्गलकामेन रामस्य चरिताद्भुतम्॥ ७॥

---

1 °भृत्यः A.
2 ऋश्य° Mr ऋष्य° A.
3 खल्वधोस्याधां Mr खलु मिथिलायां A.
4 कार्यं निर्वर्त° A.
5 राज्याभिषेकानन्तर° A.
6 सकाशमहमा° A.
7 सु add. Mr.
8 वनचराः A.
9 ऋश्य° Mr ऋष्य° A.
10 °भरणजालं च समर्पयिष्यन्ति A.
11 °व्यापृतै° A.
12 °गम° for °गमन° A.
13 एतत् A.
14 °वृश्य° Mr °वृष्य° A.
15 हन्त A.
16 हस्तौ निपीड्य A.
17 °महत Mr °महह A.
17a कदादि Mr कथापि A.
18 इति add. A.
19 Mr has a lacuna; A has none.
20 अवशिष्टं add. A.
21 सविस्मयं add. A..
22 एतत् add. A.
23 विभाव्य A.
24 अगस्त्यः om. Mr.

तदेतद् भवतो विदितम्। अत्र[1] देवासुराणामप्यप्रधृष्यं दिव्यास्त्रजातं साक्षादेवास्माभिर्दत्तम्। ततश्च कुतश्चित् कारणाद् भवदाश्रमे निक्षिप्तं माहेन्द्रं धनुर्वरं शिष्यमुखेन याचितम्। तच्च भवता मिथिलागताय रामाय प्रेषितम्। ततश्चास्मदीयतपःप्रभाव-[2]प्रमोदितबुद्धिना माल्यवता प्रोत्साहितस्य जामदग्न्यस्य हस्ताद् वैष्णवं धनुरप्यानीय दापितम्। यच्चान्यदपेक्षितं तत् सर्वं मया सङ्कल्पेन[3] साधितम्। इदानीमेतावदवशिष्टम्। मायाविनो राक्षसा भवन्ति। यथा रामस्तदीयमायावशंवदो न भविष्यति तथा [4]प्रयततां भवता" इति। परिक्रम्यावलोक्य च।

अयं[5] रामः कामप्रतिमसौन्दर्यगरिम्णा नेत्रानन्दं जनयति। रामस्याग्रतोऽवतरणं नाटयति॥

रामः। ससम्भ्रममुत्थाय। भगवन् अभिवादये॥

अग०। अप्रतिहतास्ते मनोरथाः सिध्यन्तु॥ उपविशतः॥

रामः। अहो महान् प्रसादः यत् स्वयमेव भवान् अगस्त्यो[6] मामनुगृह्णाति॥

अग०। किमन्यदीयं कार्यम्। अस्मदीयतपोविघ्नकारिणामेव वधे प्रवृत्तोऽसि। ते च मायाविनः। अतस्तेषां मायाबलं ज्ञात्वा तद्विजये प्रवर्तितव्यम्।

मायाबलमविज्ञाय महाबल मनागपि।
मायाविनं [7]त्वं --- मनसापि न चिन्तयेत्॥ ८॥

[8]ददामि ते दिव्यं चक्षुः॥ [9]इति कमण्डलूदकेन नेत्रे परिमार्जयति॥

रामः। हन्त लङ्कावृत्तान्तः प्रत्यक्षं प्रतिभाति॥

अग०। किं पश्यसि॥

रामः। रावणो राक्षसराजः सर्वप्रकृतिभिः परिवृतो मन्त्रयते॥

रावणः। मातामह [10]किमत्र कृत्यम्॥

---

[1] तत्र A.

[2] °प्रचोदित° A.

[3] एव add. A.

[4] प्रत्यायनं भवेत् A.

[5] For अयं . . . जनयति A reads a verse:

अयं रामः कामप्रतिमतनुसौन्दर्यगरिम-
श्रिया नेत्रानन्दं जनयति जनानां
जडधियाम्।
चिरादन्तश्चेतः परिचितचिदानन्दपरम-
श्रिया ब्रह्मानन्दं मम मनसि नित्यं
प्रथयति॥

I number this verse as 7 a.

[6] आगत्य A.

[7] प्रति स्पर्धा for त्वं and lacuna, A.

[8] अतो add. A.

[9] इति om. A.

[10] मातामह add. A.

माल्यवान्[1] ।

त्वया यद्यत् कृत्यं कपटविधिना तत्तदखिलं
[2]प्रवृत्तं दुर्दैवादहह विपरीतं परिणतम् ।
महावीरो वाली तव च परमः[3] पौरुषबले[4]
मदाध्मातो[5] हन्त त्वरितमभियातो विनिहतः ॥ ९ ॥

वयं च[6] [7]अग्रतः स्थातुमपि न शक्ताः । यतः ।

अस्माकमपि लोके द्वावप्रकम्प्यौ महाबलौ ।
राजा वानरवीराणां रामश्च क्षत्रियान्तकः ॥ १० ॥

[8]द्वयोरपि रामो जेता[9] । अवधारितमेव पूर्वमस्माभिर् यो वालिनं हन्ति हता वयं[10] तेन[11] इति । परन्तु[12] एकवारं तूष्णीन्दण्डः प्रयोज्यः । फलं तु दैवायत्तम् । प्रकाशदण्डस्तु रामे[13] न प्रसरतीति [14]प्रसिद्धमेव ॥

राव० । तत् कथ्यतां[15] यत्ते मनसि वर्तते ॥

माल्य० । इदानीमेव मे चारैरावेदितं ऋष्यमूके[16] रामः कतिपयैरेव वानरैः परिचर्यमाणः प्रतिवसति । लक्ष्मणस्तु सुग्रीवपट्टाभिषेकाय किष्किन्धां प्रस्थितः[17] । स च कतिपयैर्दिवसै रामसकाशमागमिष्यति । विभीषणः पुनर्मासचतुष्टयं सुग्रीवसकाशे वत्स्यतीति । इदानीमन्योन्यविप्रयुक्तौ रामलक्ष्मणौ ।

परस्परविनाभावे परस्परसहाययोः ।
छद्मदण्डप्रयोगश्चेत् सफलो भविता तयोः ॥ ११ ॥

राव० । स[18] कीदृशः ॥

माल्य० । यदा तावल्लक्ष्मणः सुग्रीवसकाशादृष्यमूकमागच्छति[19] तदा मध्येमार्गमिन्द्रजिता लक्ष्मणस्याग्रतो मायासीतायाः शिरश्छेदः कर्तव्यः । तदा लक्ष्मणो मुहूर्तं मोहमापत्स्यते ।

---

1 किमत्र कृत्यम् add. A.
2 प्रयुक्तं A.
3 परमं A.
4 °बलं A.
5 जयार्थी युद्धाय A.
6 तु for च A.
7 रामस्य add. A.
8 तयो° A.
9 विजेता A.
10 च add. A.
11 एव add. A.
12 पुनरपि add. A.
13 Mr, A read रामेण for रामे न.
14 सिद्ध° for प्रसिद्ध° A.
15 Mr reads कथयतां.
16 ऋश्य° Mr ऋष्य° A.
17 प्रविष्टः A.
18 स om. A.
19 °दृश्य° Mr °दृष्य° A.

सङ्ग्रामप्रयोजननिवृत्त्या निरुत्साहो विभीषणश्च[1] सम्पत्स्यते । तदानीमिन्द्रजिता [2]मुहूर्तान्तराले लक्ष्मणो[3] जेतव्यः । अतिधीरस्यापि पुरुषस्य स्व[4]ज्ञानविषये

आकस्मिके[5] वा सम्पन्ने विनिपातेऽतिदारुणे ।
अङ्गारे वाङ्घ्रिणाक्रान्ते जायते विकलं मनः ॥ १२ ॥

[6]त्वया च विद्युज्जिह्वमायानिर्मितं सीताशिरो रामस्याग्रतो निक्षेप्तव्यम् । ततः सोऽपि मोहमापत्स्यते । ततः प्रागेव समा[7]श्वसनादविलम्बेन जेतव्यः ॥

राव० । यद्यपि युक्तं त्वयाभिहितं इदं तु सम्भाव्यते । कदाचित् प्रत्यक्षापराधाद्द्विगुणितकोपौ[8] तद्वस्त[9] रामलक्ष्मणौ भवेताम् । तदा तत्सन्निधानं अस्माकं[10] अनर्थहेतुरेव ॥

माल्य०[11] । तदा युद्धं कृत्वा[12] मर्तव्यमस्माभिः । [13]तदर्थं [14]राक्षसबलं भवन्तमिन्द्रजितं [15]वानुगच्छतु । कुम्भकर्णश्च प्रबोधयितव्यः ॥

राव० । किं सर्वविनाशोपायं चिन्तयसि । सर्वथा रामलक्ष्मण[16]सन्निधानमस्माभिः परिहरणीयमेव ॥

माल्य० । क्व वा नि[17]गूढप्रदेशे निलीनो भवितुमिच्छसि सीतापहार[18]निमित्ते महावैरे जाग्रति ।

मातृगर्भं प्रविष्टानामपि नः[19] सर्वथा पुनः ।
रामरूपान्महामृत्योर्न[20] मोक्ष इति मे मतिः ॥ १३ ॥

औदासीन्यमवलम्ब्य । कथि[21]तमरणापेक्षया वीरधर्मेण मृत्युः श्लाघ्यः । दण्ड एव शरणमस्माकम् । अत्र च

तूष्णीन्दण्डः प्रयोक्तव्यस्तस्य सिद्धौ ध्रुवो जयः ।
प्रकाशदण्डे मृत्युश्च यतः[22] श्रेयश्च शाश्वतम् ॥ १४ ॥

---

1 वा add. Mr.
2 मुहूर्ताद्रामो for मुहूर्तान्तराले A.
3 च add. A.
4 ०जन० for ०ज्ञान० A.
5 ०कस्मिकोपसम्प० A.
6 यत add. A.
7 ०श्वासाद० A.
8 ०कोपो Mr ०कोपौ A.
9 तद्वत्स्थैर्यौ A. Mr has a lacuna.
10 अस्माकं om. A.
11 माल्य० om. A.
12 कर्तव्यम० *for* कृत्वा मर्तव्य० A.
13 माल्य० add. A.
14 च सर्वं add. A.
15 चानु० A.
16 ०णौ स० Mr ०णस० A.
17 निगूढं प्र० Mr गूढप्र० A.
13 ०हारि नि० Mr ०हारनि० A.
19 न Mr नः A.
20 न om. Mr.
21 कुत्सित० A.
22 यशः A.

औदासीन्ये[1] मृत्युरश्रेयस्यापवादश्च[2]। अतो यथास्माभिरभिहितमनुमीयताम्[3]।

जयो वा मृत्युर्वा भवतु नियतं मे मतमिदं
रिपावौदासीन्यं मनसि न समाधानमयते।
अनारम्भो[4] नित्या विपदितरथा चेदनियता
तदानीमुद्योगो ननु पुरुषधर्म्यो[5] वक्रमतः ॥१५॥

[6]इति ॥

अग॰। सर्वं भवता प्रत्यक्षमवगतम्। इतःपरं राक्षसचेष्टिते विश्वासो विषादश्च मा भूत्। अप्रतिहतधैर्यो विजयस्व राक्षसान्। आदित्यहृदयं[7] ते विजयप्रदमुपदिशामि ॥

उपदेशं नाटयति ॥

रामः[8]। वर्षाकाले व्यतीते राक्षसानामुन्मूलनं मया सङ्कल्पितम्। तत् कतिपयैरेव दिवसैर्भविष्यति ॥

अग॰[9]। प्रियं मे ॥

रामः[10]। किन्तु लक्ष्मणः कथं राक्षसचेष्टितं विज्ञास्यतीति पर्याकुलं मे हृदयम् ॥

अग॰। लक्ष्मणविभीषणयोरविनाभावेन भवितव्यम्। स[11] एव सर्वमावेदयिष्यति। तस्य राक्षसमाया[12] राक्षसजातिवशेनैव[13] प्रत्यक्षा। अतः क्षणमात्रमपि[14] लक्ष्मणो[15] विभीषणश्च पृथगाभियेताम्। वानरबलं च सर्वं सन्नद्धमेव तिष्ठति[16]। तत् किल महता राक्षसबलेन योद्धुं भूलोकमवतीर्णं देवतानीकमेव[17]। तदेतत् सर्वमद्यैव लक्ष्मणाय सुग्रीवविभीषणाभ्यां च सन्दिश्यताम्। अहं च निजाश्रमं गमिष्यामि। [18]इति उत्थाय। सहर्षम्। हन्त त्वयेदानीं

लङ्काद्वीपगतं निशाचरबलं[19] कृत्स्नं पराभूयते
दिष्ट्या सत्वरमस्मदीयतपसो विघ्नो विनिर्धूयते।
उल्लासो मन[20] - - - र्दिविषदामुच्चैरुपादीयते[21]
सम्यक्पालनशीलनेन जगतां सौख्यं समाधीयते[22] ॥१६॥

---

1 ॰सीन्यं तु A.
2 च om. A.
3 ॰स्मदभिहितमनुष्ठीयताम् A.
4 ॰रम्भे A.
5 ॰धर्मौ A.
6 इति om. A.
7 च add. A.
8 अनुगृहीतोऽस्मि add. A.
9 अग॰ om. A.
10 रामः om. A.
11 विभीषण A.
12 ॰सी मागा A.
13 A reads this एव *after* प्रत्यक्षा.
14 ॰मात्रं (om. अपि) A.
15 विभीषणेन लक्ष्मणो न मोक्तव्यः for लक्ष्मणो . . . ॰येताम् A.
16 तिष्ठतु A.
17 देवता Mr *only* देवतानीकमेव A.
18 इति om. A.
19 ॰कुलं A.
20 सनसीशितुर्दि॰ A.
21 ॰पाधीयते A.
22 Mr has also स्थी above धी. समास्थीयते A.

कतिचित् पदानि गत्वा समन्तादवलोक्य । हन्त भोः । कतिपयदिवसैरस्मिन् प्रदेशे गर्जतां वानरेन्द्राणामट्टहासैर्दिशो विदिशश्च विदारयिष्यन्ति ।

विभ्यङ्गूपरिरम्भकौणपवधूनिर्भिन्नगर्भार्भक-
भ्रंशोद्भावितभीमभोगगरिमन्युद्भूतदम्भोलयः ।
यच्चप्रेषणदुद्भवप्रविलयप्रारम्भसम्भावित-
स्वर्गौकः प्रतिलम्भसम्भृततमः सम्भारजम्भारयः ॥ १७ ॥

इदं च ते लङ्काकिष्किन्धयोरन्तरालं निशाचरशवैरलङ्करिष्यते ।

उद्भूतप्रतिभूपभूमिविभुताविभ्रंशदुद्भावना-
माबिभ्रद्भवदीयनिर्भरभुजासंरम्भसम्भावितम् ।
उद्यद्भैरवभारभावितभवद्भ्रूभङ्गभङ्गीमिल-
द्गम्भीरोद्भटभूरिभीमरणितप्राग्भारगर्भं धनुः ॥ १८ ॥

इति निष्क्रान्ताः सर्वे ॥

॥ षष्ठोऽङ्कः ॥

ततः प्रविशत्याकाशयानेन प्रहृष्ट इन्द्रो दशरथश्च ॥

इन्द्रः । महाराज चिरात् परिपूर्णोऽयमस्मन्मनोरथः । अयं[10] तवात्मजो महात्मा[11] रामभद्रः[12] ।

हत्वा हन्त दशाननं सतनयं सभ्रातरं सान्वयं
हित्वा स्त्रैणमहो निहत्य तरसा सर्वं च सेनागणम् ।
दत्वा तत्र विभीषणाय नमते लङ्काधिराज्यश्रियं
तन्वाख्यायिनि जातवेदसि ततः सीतां प्रियामादित ॥ १ ॥

दशरथः । [13]अहो भगवता हव्यवाहनेन महान् प्रसादः प्रदर्शितः यदात्मानं प्रविष्टामपि तदवस्थामेव सीतामङ्केनादाय [14]सुग्रीवादिसमक्षं सुपरिशुद्धामाविद्य रामाय समर्पितवान् ॥

[1] °रम्भिकौ° A.
[2] °भाव° A.
[3] °न्यग्भूत° A.
[4] °दम्भोलयः A.
[5] स्वर्भोगप्रति° A.
[6] °ष्यति A.
[7] °सम्भार° A.
[8] °रणितंप्रा° Mr °रणितप्रा° A.
[9] °मस्माकं मनो° A.
[10] किल add. A.
[11] महात्मा om. A.
[12] रामचन्द्रः A.
[13] अन्धो Mr अहो A.
[14] सुग्रीवसम° A.
[15] समापित° Mr समर्पित° A.

इन्द्रः। [1]कस्तस्य प्रतिकूले कर्मणि [2]वर्तते अनुकूले कर्मणि[3] वा न [4]वर्तते। तदीयपौरुषावष्टम्भेन हि सर्वलोकाः कृतार्थाः॥

दश०। इत्थं भवन्तो रामस्य पौरुषातिशयं [5]स्तुवन्ति। मम त्वेतावदेव बहुमतं यदा[6]रण्यवासात् प्रतिनिवृत्य[7] सीतालक्ष्मणाभ्यां सह क्षेमेण पुर[8]मयोध्यामागत इति। अनेन[9] [10]प्रियगम्यैकविधानेन

पुरस्तात्[11] कैकेयीवचनपरिपाटीपरवता[12]
पुरन्ध्रीसध्रीचा गहनपदमध्यासितमितः।
पुनः प्राप्तं दृष्ट्वा कुशलिनमयोध्यापुरमिमं
पुनर्जातं मन्ये पुरुषपरिणामं सुचरितम्॥२॥

इन्द्रः। रामचन्द्रानुभावेन त्रयो लोकाः पुनर्जाताः। अन्यत्र[13] भावं जानन्नपि व्यवहरसि। पितापुत्रभावो हि मानं[14] गोपयति।

नेपथ्ये। भो भोः सामाजिकाः [15]त्वर्यन्तां त्वर्यन्तां रामभद्र[16]स्याभिषेकाय। अयं किल रामचन्द्रपट्टाभिषेक[17]महोत्सवदिदृक्षया स्वर्गलोकादवतीर्य साकेतनगरसन्निकृष्टे नभोमध्ये प्रतीक्षते

महेन्द्रस्य[18] प्राप्तः[19] प्रणयभरमर्धासनगतो
महाभागः कामं सुरपरिषदुन्नीतविभवः।
महानन्दोद्रेकप्लवभरपराधीनहृदयो
महाराजः साक्षाद् द्युमणिरिव दीप्त्या दशरथः॥३॥

इन्द्रः[20]। भगवानरुन्धतीपतिः प्रकृतिवर्गं त्वरयित्वा रत्नमये पीठे[21] रामचन्द्रं निवेशयति। तत् प्रस्तूयतां[22] मङ्गलानि।

गन्धर्वा घनरागबन्धमधुरं गायन्तु कान्तस्वरं
गम्भीराभिनयप्रयोगचतुरा नृत्यन्तु रम्भादयः।
दीप्तानि त्वरिताः किरन्तु परितः पुष्पाणि विद्याधरा
दिव्या दुन्दुभयो गभीरनिनदाः कुर्वन्तु कोलाहलम्॥४॥

---

1 जगतामुपकारी रामचन्द्रः add. A.
2 प्रवर्तते A.
3 कर्मणि om. A.
4 प्रवर्तते A.
5 सम्भवति Mr स्तुवन्ति A.
6 यद्रण्य° A.
7 °निवृत्तः A.
8 पुनरयो° A.
9 हि add. A.
10 धर्मैकप्रधानेन A.
11 पुरा तत् A.
12 °परता Mr °परवता A.
13 अस्य प्रभावमजानन्निव A.
14 पुत्रस्य महिमानं A.
15 त्वर्यतां त्वर्यतां A.
16 °चन्द्रस्य राज्याभि° A.
17 °षेकोत्सव° A.
18 °हेन्द्रेण A.
19 प्राप्तप्रणय° A.
20 इन्द्रः om. A.
21 सीतासहितं add. A.
22 °यन्तां A.

दृश॰। दिष्ट्या वसिष्ठादिभिः सीतासमेतो रामचन्द्रः सर्वेभ्यः सागरेभ्यः[1] नदीभ्यश्च समानीतैः पुण्योदकैरभिषिक्तो दिव्यमालाम्बरधरो दिव्यचन्दनैरनुलिप्तो[2] दिव्याभरणैरलङ्कृतो दिव्येन किरीटेन विराजमानो दिव्यासनोपविष्टो[3] दिव्यया राज्यलक्ष्म्या[4] विराजते। सफलमद्य [5]सञ्जातं मे[6] चक्षुः॥

इन्द्रः[7]। आचार इति[8] रामचन्द्रपट्टाभिषेको मयि[9] मतः। न पुनरस्याभिषेकेण राज्याधिकारः क्रियते। अनेन ह्यवलम्बितानामपि राज्यं करस्थम्।

[10]अयं तावदरिं[11] हत्वा [12]स्वराज्ये विनिवेशितः।
विभीषणश्च धर्मात्मा लङ्काराज्येऽभिषेचितः॥५॥
सुग्रीवः किल किष्किन्धाराज्यलक्ष्मीमवापितः।
असाध्यमिदमत्यन्तमन्यस्य मनसापि वा॥६॥

नेपथ्ये कलकलः[13]॥

इन्द्रः[14] पृष्ठतोऽवलोक्य। अहो भगवान् महेश्वरो[15] ब्रह्मणा सह सत्वरमित[16] एवाभिवर्तते। प्रत्युद्गमनेनाराधयामः[17]॥

इति निष्क्रान्तौ॥

॥ शुद्धविष्कम्भः॥

ततः प्रविशत्यभिषिक्तो[18] रामः सीता[19] वसिष्ठादयश्च॥

वसिष्ठः।

आकल्पान्तमनेककोटिगुणितैरर्थैरनेकाध्वरै-[20]
रानन्दं गमयन्ननेकविभवान् दिव्यानदिव्यानपि।[21]
आत्मीयानुपलालयन्नविरतैरैश्वर्यविश्राणने-
राशीर्वादपरम्परामनुभवन्नस्माकमास्तां भवान्॥७॥

---

1 सर्वाभ्यः add. A.
2 ॰गन्धै॰ A.
3 दिव्यसिंहासनो॰ A.
4 राज॰ A.
5 जातं A.
6 A reads मे *before* सञ्जातं.
7 इन्द्रः om. A.
8 उत्सव इति add. A.
9 बहुमतः for मयि मतः A.
10 अहं A.
11 ॰दरीन् A.
12 स्वा॰ A.
13 कलकलः om. Mr.
14 इन्द्रः om. Mr.
15 इन्दुमौलिः A.
16 च add. A.
17 Mr has also वः above ॰मः. ॰मः A.
18 सपरिवारो add. A.
19 च add. A.
20 ॰मनन्त॰ A.
21 ॰विबुधान् A.

विश्वामित्रः ।

आलोकालोकशैलाद्[1]विकलमवनीमात्मकीर्तिप्रकाशै-
राशापालानुभावग्रसनगुरुतरैरन्विता[2]मादधानः ।
आज्ञामात्रा[3]वशेषानपि रिपुनृपतीनात्तगन्धानपास्य-
न्नाचन्द्रार्कं धरित्र्यामनुभवतु भवानाधिराज्यप्रतिष्ठाम् ॥ ८ ॥

रामः । अनुगृहीतोऽस्मि ॥

सीता । परम[4]ङ्घविसा[5]णाणंमुणीणं ण[6] विसंवअइ वाआ । अवि[7] अ ।

दिट्ठाजे हि पडिट्ठिआतिङ्गवणे सेट्ठा हिसारासल-
दुट्ठारम्भपरम्मुहासहरिधाणिट्ठापरीतं तद् ।
णट्ठासिसकडोरकिब्बिसमहाकट्ठावि लूणत्तद्
सट्ठा सिद्धमुरारिसङ्करसुरंजेठाण हावत्तये ॥ ९ ॥

अरुन्धतीं प्रति । भअवू अरुन्धओ देओ विसअं एव्व अम्हाणं ण आरिसंअउणं । गहं कुणअति अहो अम्हाणं भाअहेअम् ॥

ततः प्रविशत्याकाशयानेन ब्रह्मणानुगम्यमानो महेश्वर इन्द्रदशरथौ च ॥

इन्द्रः । सखे महाराज पश्य पश्य सुहृद्भ्रातृभिर्यथोचितं सेव्यमानस्य सीतासमेतस्य रामचन्द्रस्य दर्शनीयताम् ।

शत्रुघ्नः शरदिन्दुकु[8]न्दधवलं छत्रं दधाति स्वयं
सुग्रीवस्य विभीषणश्च विभृतः पार्श्वद्वये चामरे ।
सानन्दं व्यजनेन वीजयति च स्वैरं सुमित्रासुतः
सुप्रीतो युवराज एष भरतः [9]सौध्योपचारे स्थितः ॥ १० ॥

दश°[10] । एतादृशं रामभद्रं पश्यामि ॥

रामादयः सर्वे सत्वरमुत्थाय [11]भूयोभूयः प्रणम्य महेश्वरं वैदिकस्तोत्रैराराध्य बद्धाञ्जलयस्तिष्ठन्ति ॥

---

1 °शैलोद्° Mr °शैलाद्° A.

2 °रञ्चिता° A.

3 °मात्रादशे° A.

4 °मत्य° A.

5 °विसाणं Mr °विसाणाणं A.

6 वअणं ण विसंवदइ A.

7 A om. the rest of this speech अविअ . . . भाअहेअम् (line 13 below).

8 °बिम्ब° A.

9 स्वीयो° A.

10 अहो ममानन्यसुलभं भाग्यं यद् add. A.

11 साष्टाङ्गं add. A.

महेश्वरः[1]। सुप्रीता वयं भवदीयचरिताद्भुतेन यत् त्वया रक्षोमृत्युग्रस्तं जगज्जातमुज्जीवितम्।

पुनर्जाता इमे लोकाः पुनर्जाता इम प्रजाः।
पुनश्चैते त्रयो वेदाः पुनर्यज्ञादिकाः क्रियाः॥११॥

[2]एतावत्[3]कालेन त्वया जगतामुपद्रवो निरस्तः[4]। अद्य प्रभृति परिपालने तवाधिकारः।

एतावन्तं त्वया कालं युद्ध[5]श्रद्धावलम्बिता।
धर्मदानदयावीर[6] त्वामिदानीमुपस्थिता॥१२॥

यद्[7] भवान् वसिष्ठविश्वामित्रोपदिष्टमार्गेण लोकरक्षाध्वरे दीक्षितो भवतु।

सर्वे सन्तु परस्परं सुमनसः सान्द्रप्रमोदा जनाः
सन्तुष्यन्तु समीहन[8]प्रणयनैः सम्भाविताः साधवः।
सद्यः सिद्धिमुपैतु[9] सज्जनमनःसत्कार्यचिन्ता सदा
सायम्प्रातरमी तवैव विभवं[10] सम्प्रार्थयन्तो[11] जनाः[12]॥१३॥

ब्रह्मा।

त्रैलोक्यकुशलं[13] राम त्वया यत्नेन साधितम्।
सुखी भव चिरं जीव सर्वत्र विजयीभव॥१४॥

सौजन्यैकरसेन सान्द्रनिभृतस्नेहेन सौमित्रिणा
साकं कर्मसु सावधानमनसा सत्येन धर्मेण च।
सर्वानन्दविधायि साधुचरितं सर्वात्मनासाधयन्
सौराज्यातिशयेन सर्वसुजनश्लाघ्यो यशस्वी भव॥१५॥

भरतो[14] यौवराज्ये[15]ऽधिकृतः शत्रुघ्नेन सह तव यशः सम्पादयतु॥

इन्द्रः। सकलभुवनाभिराम रामचन्द्र तव[15a] प्रभावेन पुनः स्वाराज्ये प्रतिष्ठापितो[16]ऽस्मि। सर्वे वेदा[17] निरुपद्रवाः सम्पन्नाः। निश्चिन्ता[18]श्च सर्वे लोकाः[19]।

---

1 रामं प्रति add. A.
2 धन add. A.
3 °वता का° A.
4 निरासितः A.
5 युद्धवीरोऽवलम्बितः A.
6 °वीराः A.
7 तद् A.
8 समीहित° A.
9 °मुपैति orig., but also तु beside it, Mr °मुपैतु A.
10 विजयं A.
11 °यन्तां A.
12 द्विजाः A.
13 °कुतूहलं Mr °कुशलं A.
14 अपि add. A.
15 °राज्याधि° A.
15a तव om. A.
16 °तिष्ठितो A.
17 लोका A.
18 निश्चिता° A.
19 देवाः A.

हव्यान्यद्यप्रभृति भुवि नः कल्पयिष्यन्ति हन्त
क्षोणीदेवा मुदितमनसः सर्वतो यज्ञभागान्।
राज्ञां योग्यैस्त्वमपि बहुभी राजसूयाश्वमेधै-
रिष्ट्वा यज्ञैः समधिगमय स्फारमानन्दमस्मान् ॥ १६ ॥

दश०। वत्स रामभद्र।

त्वया लोकैकवीरेण धर्मनिष्ठेन धीमता।
नरो मम समो नास्ति न भूतो न भविष्यति ॥ १७ ॥

एक[1]स्तावत्तवारण्यवासमूलः[2] शोक एतावन्तं कालमवस्थितः। इदा[3]नीमहं तमानन्दमनुभवामि।

तवारण्ये वा[4]सान् मम हृदि महाशोकविकले
न किञ्चित् स्वारस्यं त्रिदशपदला[5]भेऽप्यलभत।
त्वयि प्रत्यावृत्ते पुनरिह महानन्दभरिते
न धत्ते भूमानं मम मनसि निःश्रेयसमपि ॥ १८ ॥

इतःपरमिष्टतमैरिष्टापूर्तैरिक्ष्वाकुवंशजानामस्माकं [6]शाश्वतं पदं परिकल्पय। वयं[7] श्रेयःसन्तानसिद्धिमाशास्महे। सर्वानिमांल्लङ्कासमरसुहृदः सुग्रीवाङ्गदप्रमुखान् यथोचितं सम्भाव्य प्रजारक्षणमवलम्बस्व।

आदित्यैरभिरूपधारितमहीभारैरुदारैर्नृपै-
राविर्भूतगुणानुभावगुरुभिर्धर्मेण गुप्ताः प्रजाः।
आप्तैरात्महितावधारणचणैरारब्धनिर्वाहकै-
रादिष्टेन पथानुपालय महीमाचक्रवालाचलम् ॥ १९ ॥

[8]वसि[9]ष्ठविश्वामित्रौ विना न किञ्चिदपि त्वया मन्त्रयितव्यम्।

[10]वसिष्ठारुन्धतीजाने विश्वामित्र महामुने।
युवामशेषकार्येषु युक्तौ स्यातामतन्द्रितौ ॥ २० ॥

वसिष्ठविश्वामित्रौ[11]। अनुगृहीतौ स्वः ॥

महेश्वरः। सर्वे भवन्त इहैव नित्योत्सवाः सन्तु। वयं च स्वं स्वं स्थानं प्रविशामः ॥

[12]निष्क्रान्ता महेश्वरादयः ॥

रामादयः सर्वे यथोचितमुपविशन्ति ॥

---

1 एकतस्तावत्त्वदीयारण्य° A.
2 °मूलशोकः A.
3 इदानीं महान्तमा° A.
4 वासे A.
5 °लाभो A.
6 शश्वतं Mr शाश्वतं A.
7 च भवतः add. A.
8 यत् add. A.
9 वशि° Mr वसि° A.
10 महेश्वरः। तयोरभिमुखो भूत्वा add. A.
11 तौ for वसिष्ठविश्वामित्रौ A.
12 इति add. A.

विश्वा॰। किं ते भूयः प्रियमुपहरामि ॥

रामः[1]। किमितः परं प्रियमस्ति।

[2]दुर्जया जगदातङ्कहेतवो राक्षसा हताः।
प्रजापालनदीक्षा च प्रविष्टा शाश्वती मया ॥२१॥

तथापीदमस्तु। भरतवाक्यम्।

साहित्योदयसम्भृतो विजयतां[3] सम्भूय सारस्वतः
सारो यत्र समन्ततः सहृदयैः सम्भावनीयोदयः।
सम्यग्भावितसंविधानतरलः सोऽयं सुधासुन्दरः
सन्दर्भो विदुषाममन्दहृदयानन्दाय सञ्ज्ञायताम्[4] ॥२२[5]॥

इति निष्क्रान्ताः सर्वे ॥

॥ सप्तमोऽङ्कः ॥

---

[1] रामादयः A.

[2] हन्तव्या A.

[3] ॰जयते A.

[4] सन्दायताम् A.

